भागीरथी पावनी[1] च ह्लादिनी[2] ह्रादिनी तथा ।
सीता वंक्षुश्च सिन्धुश्च सप्त गङ्गा च मानद ॥६२१॥

सुप्रभा काञ्चनाक्षी च विशाला मानसाह्लदा[3] ।
सरस्वत्योघनादा[4] च सुमेरु[5]विमलोदका ॥६२२॥

621-622. O giver of honour ! (one should worship) the seven rivers (namely), Bhāgīrathī, Pāvani, Hlādinī, Hrādinī, Sītā, Vaṅkṣu and Sindhu. (One should worship) Suprabhā, Kañcanākṣi, Viśālā, Mānasāhradā, Sarasvatī, Oghanādā and Sumeru having unsullied water.

पुष्कराद्यानि तीर्थानि वितस्ताद्याश्च निम्नगा ।
शची वनस्पतिर्गौरी धूम्रोर्णा रुचिराकृतिः ॥६२३॥

सिनीवाली कुहू राका तथाचा[6]नुमतिः शुभा ।
आयतिर्नियतिः प्रज्ञा मतिर्वेला[7] च धारिणी ॥६२४॥

623-624. (One should worship) sacred places such as Puṣkara, and rivers such as the Vitastā and others. (One should worship) Śacī, Vanaspati, Gaurī, Dhumrorṇā of beautiful form, Sinīvālī, Kuhū, Rākā and auspicious Anumati. (One should worship) Āyati, Niyati, Prajñā, Mati, Velā and Dhāriṇī.

---

1. प्लवनी A.
2. ह्रादिनी ह्लादिनी DFCG
3. Thus H मानसाह्रदः D, मानसोह्लदः B, मानसह्लदा A
4. ओघनामा H, ओघोनामा F, ओगणासा , ओगनासा E
5. सुवेगा CG, सुवेतृ H
6. च om. A
7. मेधा H

Ed. Leiden v.v. 598b-602a

देवौ धाताविधातारौ[1] सप्तछन्दांसि[2] चा[3]प्यथ ।
ऐरावणश्च[4] सुरभि[5] रुच्चैः श्रवस[6] एव च ॥६२५॥

625. (One should worship) the two gods, namely, Dhātā and Vidhātā, and also the seven metres. (One should worship) Airāvaṇa, Surabhi and Uccaiḥśravasa.

धान्वन्तरिध्रु्व[7]श्चैव शस्त्राण्यस्त्राणि चाप्यथ ।
विनायकः कुमारश्च तथैव च विनायकाः ॥६२६॥

626. (One should worship) Dhānvantari, Dhruva, and arms and weapons. (One should worship) Kumāra, Vināyaka and Vināyakas.

शाखो विशाखः स्कन्दश्च नैगमेशस्तथैव च ।
मरुतश्च ग्रहाश्चैव रोगाणामधिपो ज्वरः ॥६२७॥

627. (One should worship) Śākha, Viśākha, Skanda, Naigameśa, the wind-Gods and Fever—the lord of diseases.

ऋषयो वालाखिल्या[8]श्च कश्यपागस्त्यनारदाः[9] ।
तथैवाप्सरसः पुण्याः पूज्या देवाश्च सोमपाः ॥६२८॥

628. (One should worship) Vālakhilya sages and Kaśyapa,

---

1. धातृविधातारौ CGH
2. छन्दानि BF
3. Thus other MSS वा A
4. ऐरावणं ABFH
5. सुरभिम् ABFH
6. उच्चैश्श्रवसमेव ABFH, उच्चैश्श्रवा हयः CG.
7. Thus CG, धान्वन्तरिं ध्रुवं ABFH, accusative used in this hemistich in other MSS.
8. बालखिल्याश्च BCG
9. कश्यपोऽगस्त्यनारदौ B

Ed. Leiden v.v. 602b-605

Agastya and Nārada. (One should) worship also the holy nymphs and the gods who drink Soma.

आदित्या वसवो रुद्रा विश्वे[1]देवास्तथाश्विनौ।
भृगवोऽङ्गिरसः साध्या मरुतश्च महाबलाः ॥६२९॥

629. (One should worship) Ādityas, Vasus, Rudras, Viśvedevas, Aśvinas, Bhṛgus, Aṅgirās, Sādhyas and highly strong Maruts.

धाता[2] मित्रो[3]ऽर्यमा पूषा शक्रोंऽशो[4] वरुणो भगः।
त्वष्टा विवस्वान्[5] सविता विष्णुर्द्वादश भानवः ॥६३०॥

630. (One should worship) the twelve suns, (namely Dhātā, Mitra, Aryamā, Pūṣā, Śakra, Aṃśa, Varuṇa, Bhaga, Tvaṣṭā, Vivasvān, Savitā and Viṣṇu.

धरो[6] ध्रुवश्च भोजश्च आपश्चैवानिलानलौ[7]।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥६३१॥

631. Dhara, Dhruva, Bhoja, Āpa, Anil, Anala, Pratyūṣa and Prabhāsa are proclaimed to be eight Vasus.

अङ्गारकस्तथा सूर्यो निर्ऋतिर्घोष एव च[8]।
अजैकपाच्चाहिर्बुध्न्यो धूमकेतुर्ध्वजस्तथा ॥६३२॥

---

1. words upto विश्वे om. E
2. दाता H
3. पित्र्यो A
4. Emended, शक्रेशो MSS.
5. विवस्वत् F
6. धनो BDF
7. आनिशानिलः BD, अनिलानलः A, अनिलानलाः H, अनिशानलः F
8. This verse in the accusative in ABDEFH.

Ed. Leiden v.v. 606-609

वाहन[1]श्चेश्वरो[2] मृत्युः कपालिरथ कंकणः[3] ।
एकादशैते विज्ञेया रुद्रास्त्रिभुवनेश्वराः ॥६३३॥

632-33. Aṅgāraka, Sūrya, Nirṛti, Ghoṣa, Ajaikpād, Ahirbudhnya, Dhūmaketu, Dhvaja, Vāhana, Īśvara, Mṛtyu, Kapāli and Kaṅkaṇa, these eleven Rudras should be known as the lords of three worlds.

क्रतुः दक्षो वसुः सत्यः कालः कामो[4] ध्वनिस्तथा ।
कुरु वाग्[5]दनुजो[6] विश्वे[7] रोचमानाश्च ये[8] दश ॥६३४॥

634. Kratu, Dakṣa, Vasu, Satya, Kāla, Kāma, Dhvani, Kuru, Vāk and Danuja, those ten shining ones are called Viśve (devas).

नासत्यदस्रौ विज्ञेयावश्विनौ[9] वदतां वर[10] ।
भुवनो भानवश्चैव[11] सुजन्यः सुजनः तथा[12] ॥६३५॥

त्याजः सुवश्च मूर्धा च दक्षश्च व्यश्च[13] बन्धुकः[14] ।
प्रसवश्च व्ययश्चैव भृगवो द्वादश स्मृताः ॥६३६॥

---

1. वाहनं ABDEFH.
2. चेश्वरं ABDEFH
3. मृत्युं कपालमथकंकिणम् A.—किंकणम् B, मृत्युं कपालिमथकंकिणम् FH, मृत्युः कपालिः कंकणस्तथा G, मृत्युः कपाली कंकणस्तथा C
4. कालो BF
5. रुरुभाग् ed Leiden
6. मनुजो BDEF
7. विश्वं F
8. Thus A, ते other MSS.
9. आश्विनौ CG
10. वरौ B
11. भावनश्चैव H
12. Thus ed Leiden, क्रतुः MSS.
13. अन्यश्च BDF
14. बन्धकः BF

635-36. O best among the speakers, Nāsatya and Dasra should be known as Aśvinas.

Bhuvana, Bhānava, Sujanya, Sujana, Tyāja, Suva, Mūrdhā, Dakṣa, Vya, Bandhuka, Prasava and Vyaya are regarded as twelve Bhṛgus.

आत्मा ह्या[1]युर्मनोर्वक्षो मव[2]: प्राणस्तथैव च ।
हविष्मांश्च गविष्ठश्च ऋच्च[3] सत्यस्तथैव च ॥६३७॥
इत्येतेऽङ्गिरसः पुत्राः दश देवा[4] महाबलाः ।

637-38a. Ātmā, Āyus, Manas, Dakṣa, Mada, Prāṇa, Haviṣmān, Gaviṣṭha, Ṛta and Satya these ten highly strong gods are the sons of Aṅgirā.

मनो मदश्च[5] प्राणश्च नरो[6] पालश्च वीर्यवान् ॥६३८॥
दितिर्हयो नयश्चैव हंसो नारायणस्तथा ।
विभुश्चापि प्रभुश्चापि[7] साध्या द्वादश कीर्त्तिताः ॥६३९॥

638b-39. Manas, Mada, Prāṇa, Nara, mighty Pāla, Diti, Haya, Naya, Haṃsa, Nārāyaṇa, Vibhu and Prabhu are pronounced as twelve Sādhyas.

एकज्योतिर्द्विज्योतिश्च त्रिज्योतिर्ज्योतिरेव च ।
एकचक्रो[8] द्विचक्रश्च[9] त्रिचक्र[10]श्च महाबलः ॥६४०॥
ऋतजित् सत्यजिच्चैव सुषेणः सेनजित्तथा ।
अग्निमित्रोऽरिमित्रश्च प्रभुमित्रो[11]ऽपराजितः ॥६४१॥

---

1. च CG
2. मोद: A
3. Thus FH, रीत: A, ऋभु: CG, ऋतु: ed Leiden
   2nd and 3rd pādas om. B
4. देशाः A
5. मृदो मृदश्च H
6. नर—F
7. चैव BFCG
8. एकशुक्रो E, एकशक्रो BD
9. द्विशुक्र: E, द्विशक्र BD
10. त्रिशक्र: BDE
11. प्रभमित्रो CGH

Ed. Leiden v.v. 614-618

ऋतश्च ऋतवान् धर्ता[1] निधर्ता[2] वरुणो ध्रुवः ।
विधारणो नाम तथा देवदेवो महाबलः ॥६४२॥

ईदृक्षश्चाप्यदृक्षश्च[3] ईहादृक् चा[4]मिताशनः ।
कृतिनः प्रसकृद्[5]दक्षः समरश्च[6] महायशाः ॥६४३॥

धाता चोग्रो[7] धनुर्भीमस्त्वभियुक्तः[8] सदासहः ।
द्युति[9]र्वसुरथो[10]ऽदृश्यो[11] वामः[12] काम[13]जयो विराट्[14] ॥६४४॥

एतेचै[15]कोनपञ्चाशन्मरुतः परिकीर्त्तिताः ॥६४५॥

640-45. These fortynine, namely, Ekajyoti, Dvijyoti, Trijyoti, Jyoti, Ekacakra, Dvicakra, highly strong Tricakra, Ṛtajit, Satyajit, Suṣeṇa, Senajit Agnimitra Arimitra, Prabhumitra, Aparājita, Ṛta, Ṛtavān, Dhartā, Nidhartā, Varuṇa, Dhruva, Vidhāraṇa, highly strong Devadeva, Īdṛkṣa, Adṛkṣa, Īhādṛk, Amitāśana, Kṛtina, Prasakṛd, Dakṣa, highly glorious Samara, Dhātā, Ugra, Dhanu, Bhīma, Abhiyukta Sadāsaha, Dyuti, Vasuratha, Adṛśya, Vāma, Kāmajaya, Virāṭ .... are called Maruts.

---

1. Thus CG, दर्भा BD दंता F, धाता A
2. नियन्ता F
3. ईदृक्षुश्चापदृक्षुश्च B
4. च om. BDFCG
5. कृती नम्रः सकृद् CG
6. समराः A
7. Thus ACG, ह्युग्रो other MSS.
8. चाभियुक्तः CG, अभियुक्तः H
9. महाद्युति BE, प्रद्युति H
10. om. H.
11. om. B, यशो DEF
12. वासः BDE
13. कामो DFH
14. Here one hemistich containing the names of remaining Maruts seems to be missing
15. हि H

Ed. Leiden v.v. 619-622

विश्वकर्मा ततः[1] पूज्यः सर्वशिल्प[2]प्रवर्त्तकः ।
आयुधं वाहनं छत्रमासनं चिह्नदुन्दुभी ॥६४६॥

सम्पूज्या[3] विधिवद् ब्रह्मन् गन्धमाल्यानुलेपनैः ।
दीपधूपप्रदानैश्च[4] नैवेद्यैश्च पृथक् पृथक् ॥६४७॥

646-47 Viśvakarmā, the originator of all crafts, should also be worshipped. O Brahman, each of these, namely, the weapon, the conveyance, the umbrella, the seat, the emblem and the drum, should be worshipped separately with scents, garlands, paints, offerings of lamps, incense and the eatables.

एतेषां पूजनं कृत्वा पूजनीया विशेषतः ।
ग्रहो नागस्तथा मासो[6] यः स्यात् संवत्सर[7]प्रभुः ॥६४८॥

ग्रहो भविष्यद् वर्षश्च[8] तथा मासस्य वारकः ।

648-49. Having performed the worship of these, one should worship specially the planet, the Nāga and the month which presides over the year, and (should worship) also the planet of the future year, and the (presiding) day of the month.

दैवज्ञवक्त्राद्[9] विज्ञेयौ ग्रहमासौ विचक्षणैः ॥६४९॥

---

1. Thus A, तथा other MSS.
2. सर्वशिल्पी—A
3. सम्पूज्य B
4. धूपदीपप्रधानैश्च H, धूपैर्दीपैः प्रदानैश्च C, धूपदीपप्रदानैश्च B
5. Thus other MSS, नारः A
6. सोमो B
7. संवत्सरः AF
8. वर्षस्य CG
9. —चक्राद् A

Ed. Leiden v.v. 623-626a

दैवज्ञादेव विज्ञेयं मासं वर्षं च[1] वारकम्[2] ।
एतेषां पूजनं कार्यं बह्वन्नकुसुमोत्करैः[3] ॥६५०॥

649-50. The wise would know the planet and the month from the mouth of the astronomer. The month, the year and the day also should be known from the astronomer. These should be worshipped with plenty of food and heaps of flowers.

फलवेदात्ततो[4] ज्ञात्वा नागवर्षस्य वारकम्[5] ।
तस्य[6] पूजा प्रयोक्तव्या[7] भक्ष्यभोज्यपुरःसरा[8] ॥६५१ ।

651. Having known the day of the Nāga-year from the Phalaveda, one should worship that (day) with solid food and other articles of diet.

ततो[9]ग्निहवनं कार्यं सर्वेषामनुपूर्वशः[10] ।
ओंकारपूर्वकं बह्वन् घृताक्षतयवैस्तिलैः ॥६५२ ॥

652. Then, fire-sacrifice with utterances of Oṅkāra should be performed, with reference to all, in due order, with purified butter, unhusked barley and sesame.

---

1. Thus A,—वर्षस्य CG, मासवर्षं other MSS.
2. Thus G, वारिकम् other MSS.
3. बहुग्रन्थसमोत्करैः BFG, बहुन कुसुमोत्करैः E
4. Thus A, तथा other MSS.
5. Emended: तारिकम् H, वारिकम् other MSS.
6. ह्यस्य BDE
7. प्रकर्तव्या F
8. पुरस्सरम् H
9. अतो CG
10. अन्नपूर्वकः A

तान् पृथक् पृथगुद्दिश्य देया विप्रेषु दक्षिणा ।
ब्राह्मणा भोजनीयाश्च सुहृत्सम्बन्धिबान्धवाः ॥६५३॥

653. Sacrificial fee should be given to the Brāhmaṇas with separate reference to each of those (planets etc.). Then Brāhmaṇas, the friends, the relations connected by marriage and the kinsmen should be fed.

विशेषवच्च भोक्तव्यं कार्यं च महदुत्सवम्[1] ।
पूजनीया द्विजश्रेष्ठ तथा ज्योतिषका द्विजाः ॥६५४॥

654. Special meals should be taken and a great festival should be celebrated. O best among the twice-borns, Brāhmaṇa astronomers should be worshipped.

धनधान्यौघवस्त्रैश्च[2] पूजनीया[3] द्विजोत्तमाः[4] ।
फलवेदविदश्चैव त्वितिहासविद[5]श्च ये ॥६५५॥

655. The best of the Brāhmaṇas—those who are acquainted with astronomy-astrology and those who know history—should be honoured with cash-money, heaps of grains and clothes.

वाचकाः[6] पूजनीयाश्च दक्षिणाभिमुखा द्विज[7] ।
आत्मशोभा च कर्तव्या पुष्पालंकारभूषणैः ॥६५६॥

656. O twice-born, the reciters (of the Purāṇas and the Epics) desiring sacrificial fee should also be worshipped. One

1. कार्यश्चापि महोत्सवः CG
2. धनधान्यैश्च—H
3. Thus A, पूज्याश्च other MSS.
4. Thus A, द्विजपुङ्गवाः other MSS.
5. Thus A, तु om. other MSS.
6. याचकाः BD
7. द्विजाः H

Ed. Leiden v.v. 629b-633a

should decorate one's own self with flowers, ornaments and perfumes.

कथितेयं महाशान्ति[1]: सर्वाघविनिसूदनी ।
सर्वोत्पातप्रशमनी कलिदुःस्वप्ननाशिनी ॥६५७॥

आयुष्प्रदा पुष्टिकरी धनसौभाग्यवर्धिनी ।
व्याधिशत्रुप्रशमनी राज्यराष्ट्रविवर्धिनी ॥६५८॥

मङ्गल्या च पवित्रा च लोकद्वय[2]सुखावहा ॥६५९॥

657-59. This is called Mahāśānti, the destroyer of all sins, the pacifyer of all evils, the destroyer of bad dreams of Kali, the giver of long life and prosperity, the increaser of wealth and prosperity, the destroyer of diseases and enemies, the cause of the advancement of the goverment and the country, auspicious, holy, and the giver of happiness in both the worlds.

चैत्रमाससमारम्भे[3] ये मयाभिहितास्तव ।
ते सर्वे ब्रह्मसदनं तदा यान्ति द्विजोत्तम ॥६६०॥

660. O best among the twice-borns, all those who have been mentioned by me before you, go to the abode of Brahmā in the beginning of the month Caitra.

ब्राह्मी सभा कामरूपा विशेषेण सदानघ[4] ।
धारयत्यचलं रूपमनिर्देश्यं मनोहरम् ॥६६१॥

1. Thus DEFCG, मया शान्ति: A, illegible H
2. लोकोभय—CG
3. चैत्रशुक्ल A—चैत्रमाससमारम्भो BDF
4. सदानघा CG

661. O always sinless one, the assembly of Brahmā assuming (different) forms at will, bears specially a steady form, heart-enchanting and undefinable.

तस्यां सभायां ब्रह्माण[1]मनिर्देश्यविसंयुतम्[2] ।
यथोक्तास्तु नमस्यन्ति[3] ह्युपासन्ति स्तुवन्ति च[4] ॥६६२॥

662. In that assembly, the above-mentioned (gods etc.) salute, serve and praise Brahmā undefinable and completely detached (from worldly fetters).

विश्वावसुश्शालिशिनौ[5] गन्धर्वौ च हाहाहूहू[6] ।
नारदप्रमुखाश्चान्ये गायन्ति[7] च जगद्गुरुम् ॥६६३॥

663. Viśvāvasu, Śāliśi, the two Gandharvas Hahā and Hūhu and others led by Nārada sing (the praises of) the preceptor of the world.

उपनृत्यन्ति[8] देवेशं देवरामा[9] सहस्रशः ।
उर्वशी मेनका रम्भा मिश्रकेशी ह्यलम्बुसा[10] ॥६६४॥

विश्वाची च घृताची च पञ्चचूला[11] तिलोत्तमा ।
सानुमत्य[12]मला वन्दा[13] प्राधान्येन तथेतराः ॥६६५॥

---

1. ब्राह्मणम् H
2. अनिर्देश्योजसावृतम् CG
3. om. A
4. स्तुवन्तः पर्युपासते CG
5. Thus AH, चलशिनौ F, चलिशिनौ BDE, चाशिवनौ CG, शालिशिरा ed Leiden
6. हहाहूहू CG
7. जयन्ते च DEF, यजन्ते B
8. उपानृत्यन्ति B, अग्रे नृत्यन्ति H
9. Thus CGDE, देवानाम B, देवनामा AFH
10. ह्यलम्भसा B, ह्यलंबुका AD
11. पंचचूर्णा BE
12. मानवती BDEFH
13. वृन्दा CG, मन्दा D

Ed. Leiden v.v. 638-641

664-65. Thousands of divine damsels, specially Urvaśī, Menakā, Rambhā, Miśrakeśī, Alambusā, Viśvācī, Ghṛtācī, Pañcacūlā, Tilottamā, Sānumatī, Amalā, Vandā and others dance near the lord of the gods.

तदा[1] पितामहो[2] देवः सर्वदेवसमागमे ।
अब्दे[3] नियुङ्क्ते[4] मानुष्ये ग्रहादींस्तत्रपालकान् ॥६६६॥

666. Then, in that assembly of all the gods, the god Brahmā appoints the planets etc. as protectors of the Human year.

कृत्वोपासां[5]जगद्भर्तुर्यान्ति स्थानान्वतःपरम् ।
स्वानि स्वानि द्विजश्रेष्ठ हृष्टपुष्टा दिवौकसः[6] ।६६७॥

667. O best among the twice-borns, having worshipped the sustainer of the worlds, the gods—pleased and streng thened—go after this, to their respective places.

चैत्रे मासि[7] सिते पक्षे पञ्चम्यां द्विजसत्तम ।
श्रियश्च पूजनं कार्यं प्रोक्ता श्रीपञ्चमी तु सा ॥६६८॥

668. O best among the twice-borns, Śrī should be worshipped on the 5th of the bright-half in the month of Caitra. That is called Śrī-Pañcamī.

---

1. Thus other MSS, तथा A
2. Thus DEFCG, पितामहा AH
3. आब्दे E
4. नियुक्ते A
5. कृत्वोपमां H
6. नीलमते नववत्सरः A, नीलमते नवसंवत्सरः BDEF, इति श्री—H
7. चैत्रमासि CG

Ed. Leiden v.v. 642-644

सर्वथा[1] पञ्चमी पूज्या चैत्रे मासि ध्रुवं[2] तथा[3] ।
यस्तु सम्पूजयेत्सर्वा पञ्चमी[4] तु करीषिणीम् ॥६६९॥

नासौ विमुच्यते लक्ष्म्या यावज्जीवं द्विजोत्तम ।
विष्णुलोकमवाप्नोति देहभेदे द्विजोत्तम ॥६७०॥

669-70. The fifth day deserves worship by all means and definitely so the one in the month of Caitra. O best among the twice borns, he who worships Lakṣmī on all the fifth days, is not separated from her throughout his life and after death he obtains the world of Viṣṇu.

स्कन्दस्य तत्र कर्तव्या पूजा माल्यैः सुगन्धिभिः[5] ॥६७१॥

गन्धालंकारवासांसि कुक्कुटं च निवेदयेत् ।
घण्टामजं[6] क्रीडनकं नैवेद्यं च मनोहरम् ॥६७२॥

671-72. Skanda should be worshipped there with fragrant garlands, scents, ornaments, clothes, cock, bell, goat, toy and nice eatable offerings.

ध्रुवेयं चैत्रषष्ठी च परिशेषा[7]स्तु कामतः[8] ।
यः करोति गृहे तस्य विरोगाः सर्वबालकाः[9] ॥६७३॥

---

1. सर्वा वा CG
2. ध्रुवा CG
3. तदा BDEF
4. सर्वाः पञ्चमीः CG
5. First two pādas of this verse seem to be lost.
6. अज्ञं A
7. परिशिष्टाः CG परिषेषाः A परितोषः H
8. कामदा A
9. नीलमते चैत्रषष्ठी BDF, इति श्री--H

नीलमते श्रीपंचमी स्कन्दषष्ठी च A, इति नीलमतपुराणे बालकरक्षाकारि चैत्रशुक्लषष्ठीवर्णनं नाम त्रिंशोध्यायः C Then follows नील उवाच verb om. ABDFH

Ed. Lieden v,v. 645-649

673. This 6th of Caitra is (to be celebrated) necessarily, the rest (may be celebratcd) at one's will. All the children remain healthy in his house who celebrates this.

तामेव नवमीं प्राप्य सोपवासो नरः शुचिः ।
सम्पूजयेद् भद्रकालीं पुष्पधूपान्नसम्पदा ॥६७४॥

674. On that very 9th, the purified man, observing fast, should worship Bhadrakālī with plenty of flowers, incense and grains.

सर्वा या[1] नवमी पूज्या भद्रकाली सुरेश्वरी ।
कार्यसिद्धिमवाप्नोति तस्यां पूजयिता नरः[2] ॥६७५॥

675. Bhadrakālī who rules over the gods, should be worshipped on all the 9th days, (but) he who worships her on that (9th), obtains success in his undertakings.

एकादश्यां तु चैत्रस्य शुक्लपक्षे द्विजोत्तम ।
तस्यां[3] पूजा च कर्तव्या[4] वास्तो[5]र्ब्राह्मणपुङ्गव ॥६७६॥

पुष्पालंकारधूपाद्यैश्शाकैश्च विविधैस्तथा ।
धूपैश्चविविधाकारैर्वह्निपूजाद्विजार्चनैः[6] ॥६७७॥

676-77. O best among the Brāhmaṇas, the deity presiding over house shonld be worshipped on the 11th of the bright

1. Thus H, वा BCG, च A

2. चैत्रनवमी add A, नीलमते—BDF, इति श्री—H, इति श्री नीलमतपुराणे चैत्रशुक्ले भद्रकाली नवमीवर्णनं नाम एकत्रिंशोध्यायः C Then pallows नील उवाच, verb om. ABDFH

3. तस्याः B.

4. Thus A, प्रकर्तव्या other MSS.

5. Thus other MSS, वास्तु—A

6. वास्तुपूजा add F, नीलमते--ABDE, इति--H, इति श्रीनीलमत-पुराणे चैत्रैकादश्यां वास्तुपूजावर्णनं नाम द्वात्रिंशोध्यायः C Then follows नील उवाच verb om. ABDEFH

half of the month of Caitra, with flowers, ornaments, incense, vegetables of various sorts, incenses of various types and worship of fire and the Brāhmaṇas.

द्वादशी या तु चैत्रस्य शुक्ला नित्यमुपोषितैः[1] ।
वासुदेवस्य कर्तव्या पूजा द्विज[2] यथाविधि[3] ॥६७८॥

678. On the bright 12th of the month of Caitra, Vāsudeva should be worshipped in the proper way after observing fast.

चैत्रशुक्लत्रयोदश्यां कामदेवं च[4] पूजयेत् ।
पट्टस्थं[5] विविधैर्माल्यैर्गन्धैरुच्चावचैस्तथा ॥६७९॥

679. Kāmadeva (painted) on a cloth should be worshipped with various types of garlands and diverse incenses, on the 13th of the bright half of Caitra.

आत्मशोभा च[6] कर्तव्या पूजनीया गृहस्त्रियः ।
इयं ध्रुवा विनिर्दिष्टा शेषा कार्या न वा द्विज ॥६८०॥

680. One should decorate one's own self and worship the ladies of the house. O twice-born, this (13th day) should be necessarily celebrated, the rest may be or may not be celebrated.

---

1. Thus CG, उपोषितः DEBF उपोषिता, AH
2. तत्र CG
3. नीलमते चैत्रद्वादशी BDE, द्वादशी A, इति श्री नीलमतपुराणे चैत्रशुक्लद्वादश्यां वासुदेवार्चनं नाम त्रयस्त्रिंशोऽध्यायः Then follows नील उवाच verb om. ABCEFH
4. Thus A, तु other MSS.
5. पटस्थं CG
6. Thus A, तु other MSS.

Ed. Leiden v.v. 654-656

द्वादश्यां शीततोयस्य कुम्भं पुष्पोपशोभितम्[1] ।
कामदेवाग्रतः[2] स्थाप्यं[3] पल्लवैश्चोपशोभितम्[4] ॥६८१॥

अनर्काभ्युदिते[5] काले स्नाप्या स्यात्तेन वारिणा ।
दयिता द्विजशार्दूल स्वयं[6] कान्तेन काश्यप[7] ॥६८२॥

681-82. O descendant of Kaśyapa, best among the Brāhmaṇas, on the 12th, a pitcher full of cold water and decorated with flowers and leaves should be placed before Kāmadeva (Cupid), and before sun-rise a husband himself should bathe his wife with water (from that pitcher).

चैत्रे मासि[8] सिते पक्षे पञ्चदश्यां द्विजोत्तम ।
योद्धुं याति निकुम्भस्तु पिशाचान् वालुकार्णवे ॥६८३॥

683. O best among the twice-born, on the 15th of the bright-half of the month of Caitra, Nikumbha goes for fighting with the Piśācas in the sea of sand.

तस्मात्तेषां तु मध्याह्ने एकैकस्य[9] गृहे गृहे ।
पूजा कार्या प्रयत्नेन यथावत् तन्निबोध मे[10] ॥६८४॥

1. पुष्पपयोम्भितम् B
2. कामाग्रतस्तु CG
3. संस्थाप्य CG
4. Third and fourth pādas om. BDEF
5. अनर्काद्युतिते E
6. स्व— C
7. कश्यप ABD. मदनत्रयोदशी add F नीलमते—BDE, इति श्री—H, इति श्री नीलमतपुराणे चैत्र शुक्लत्रयोदशी मदनत्रयोदशी वर्णनं नाम चतुस्त्रिंशोऽध्याय: C Then follows नील उवाच verb om. ABDEFH
8. चैत्रमासि H
9. प्रत्येकं तु CG
10. निबोधय A

Ed. Leiden v.v. 657-660

684. So, in every house, the worship of every one of those (Piśācas) should be performed with effort, in the noon. Know the procedure from me.

पिशाचं मृण्मयं कृत्वा काक्ष्यं[1] च द्विजसत्तम ।
गंधैर्माल्यै[2]स्तथा वस्त्रैरलङ्कारैः प्रपूजयेत्[3] ॥६८५॥

भक्ष्यैश्च लोपिकापूपै[4]र्मांसैः पानैस्तथैव च[5] ।
आयुधैर्विविधाकारैः छत्रोपानहयष्टिभिः ॥६८६॥

685-86. Having made the (image of the) Piśāca with clay, leaves etc., one should worship that (image) with scents, garlands, clothes, ornaments, the eatables, namely, sweet-meats, cakes, meat, drinks, weapons of various sorts, umbrella, shoes and stick.

नृभिः शुष्कान्नसम्पूर्णे[6] स्थायिभक्ष्ययुते[7] तथा ।
कुद्दालपिटके चोभे तथा तस्य निवेदयेत्[8] ॥६८७॥
गेयमानद्धवाद्यं च तन्त्रीवाद्यं च वादयेत् ।

687-88a. Men should offer to him, two baskets full of dried food and those eatables which may last long. Singing should be carried on and the instruments Ānaddha and Tantrī should be played upon.

मध्याह्ने तं तु[9] सम्पूज्य प्राप्ते चन्द्रोदये पुनः[10] ॥६८८॥

---

1. Thus CDG, काक्षं A, काक्षिं E, कक्षं B
2. गन्धमाल्यैः F
3. Thus A, च पूजयेत् other MSS.
4. Thus H, लेपिकापूपैः BCG, लेपिकाभिश्च A
5. Thus H, रपूपैर्मांसपानकैः A, मांसैः पानैस्तथाविधैः BCDEFG
6. Emended.--सम्पूर्णा ABDEFH
7. —युता ABDEFH, संस्थाप्यानेकभक्ष्यकम् CG
8. Thus other MSS, निवेश्येत् A
9. Thus A, तत्र G, तत् तु C.
10. ततः H, 688a, 689ab 690a om. BDEF

Ed. Leiden v.v. 661-664a

पूर्ववत्पूजयेद् विद्वान् स्ववित्तस्यानुरूपतः ।
तथा कृतस्वस्त्यनो ब्राह्मणैस्तु विसर्जयेत् ॥६८९॥

688b-689. Having worshipped him in the middle of the day, the wise should, according to his means, again worship him, as before, at the moon-rise. Then, he—benediction for whom has been pronounced by the Brāhmaṇas—should be sent off.

विसर्ज्यमाने[1] तस्मिं[2]स्तु[3] तन्त्रीवाद्यं च वादयेत् ।
तस्यानुव्रजनं कार्यं द्वितीयेऽहनि काश्यप ॥६९०॥

690. The musical instrument Tantrī should be played upon while he is being sent. O descendant of Kaśyapa, he must be followed on the next day.

आरोढव्यं[4] भवे[5]च्छैलं समीपस्थमि[6]ति स्थितिः ।
गृहमागत्य[7] कर्तव्यमुत्सवं[8] गीतवादितैः[9] ॥६९१॥

सुहृद्भिः सह भोक्तव्यं भोजनं तु विशेषवत्[10] ॥६९२॥

691-692. And the nearby hill should be climbed. After returning to home, the festival should be celebrated by singing, and playing on musical instruments. Special meals should be taken in the company of friends.

1. विसृज्यमाने CGH विसर्जमाने A,
2. Thus CG, वादे H, वाद्ये other MSS.
3. च A.
4. आरोढव्यो CGH, आरूढव्यं A
5. भुव: BDEF
6. शैल: समीपस्थ CG
7. आगम्य ed. Leiden
8. कर्तव्य उत्सव: CG
9. गीतवादनै: CG, गीतवाद्यत: A
10. विशेषत: BDE

Ed. Leiden v.v. 664b-667

इरा[1] नामा[2]प्सराः पूर्वं शप्ता[3] शक्रेण काश्यप ।
विश्वावसोः संप्रयुक्ता सुरोपस्थान[4]वर्जिता ॥६९३॥

693. A nymph named Irā, employed by Viśvāvasu, was formerly cursed by Śakra (and) was exiled from the assembly of the gods.

स्थावरत्वमनुप्राप्ता हिमवत्यचलोत्तमे[5] ।
बहुधा सा विभक्ताङ्गी निकुम्भे निर्गते बहिः ॥६९४॥

694. She attained the state of being a plant in the Himavat, the best of the mountains. After Nikumbha's exit, her body breaks up into various forms.

यदा[6] जाता इरा[7] देवी इरापुष्पोपशोभिता ।
इरावाटे[8] ततो गत्वा नारीपुत्रगणान्वितः[9] ॥६९५॥

सुवासाः स्वनुलिप्ताङ्गः[10] सुचित्तः[11] सुसमाहितः ।
इरासंपूजनं कुर्यात् पुष्पैरन्नै[12]र्विचक्षणः ॥६९६ ॥

695-96. When the goddess Irā is adorned with Irā flowers, the wise man—well-dressed, well-anointed, good-minded and

1. इला CG.
2. नाम्नी CG
3. Thus other MSS, प्राप्ता A
4. सुराप्रस्थान—H
5. अचलोपमे B
6. तदा CG
7. त्विरा CG
8. इरावटं BE, इरावाटं CG
9. Thus other MSS, घनान्वितः A
10. स्वानुलिप्ताङ्गः AB
11. मुदितः G
12. अन्यैः BCDFG

Ed. Leiden v.v. 668-671

well-concentrated should go to Irā-garden, accompanied by Irā wife and host of sons, and should worship the goddess his with other flowers.

निवेदयेच्च विविधान्भक्ष्यभोज्यान्[1] सदीपकान् ।
इरावाटे ततो गत्वा भोक्तव्यं च[2] विशेषवत् ॥६९७॥

697. (He) should offer various sorts of eatables and nourishments along with earthen lamps. Special meals should be taken after going to Irā-garden.

इरापुष्पैस्ततः पूज्या द्विजस्त्रीमित्रबान्धवाः ।
रक्तसूत्रनिबद्धानि[3] इरापुष्पाणि कारयेत् ॥६९८॥

698. Then, the Brāhmaṇas, the wife, the friends and the relatives should be honoured with Irā-flowers. Irā-flowers should be stitched together with a red thread.

बिभृयादात्मना तानि[4] स्त्रीषु दद्याद् विशेषतः ।
श्रोतव्यं गीतावाद्यादि द्रष्टव्यं नर्तनं[5] तथा ॥६९९॥

699. Those (stitched flowers) should be worn by one's own self and specially offered to the ladies. Vocal and instrumental music should be listened to, and dance-performancs should be seen.

इरापुष्पसमायुक्तं पानं पेयं विशेषवत् ।
इरा देवेषु[6] दातव्या तथा प्रीयन्ति[7] देवताः ॥७००॥

---

1. भक्ष्यान् भोज्यान् A, H
2. Thus A, च other MSS.
3. रक्तसूत्राणि बद्धानि A
4. बाले B
5. वर्त्तनं A
6. देवीषु E
7. पेयन्ति A

Ed. Leiden v.v. 672-675

700. Special drink containing Ira-flowers should be taken Irā (flowers) should be presented to the gods. The gods are pleased in that ,way.

इरासहस्रं यो दद्यात् केशवाय समाहितः ।

तस्य तुष्यति[1] देवेशः स्वर्गं लोकं स[2] गच्छति[3] ।।७०१।।

701. With him who well-concentrated offers one thousand Irā (flowers) to Keśava, the lord of the gods is pleased and he goes to heaven.

इरया, पूजये रुद्रं ब्रह्माणं शशिनं रविम्[4] ।

शुभां[5] करीषिणीं दुर्गां[6] सर्वास्तुष्यन्ति देवताः[7] ।।७०२।।

702. Rudra, Brahmā, the Moon, the Sun, Śubhā Karīṣinī and Durgā should be worshipped with Irā (flowers). All the gods are pleased (with the offerings of Irā flowers)

इरा नागेषु दयिता दयिता मे विशेषतः ।।७०३।।

703. Irā is favourite of the Nagas and specially mine.

इरावाटे[8] तु यः पूजां करोति मम काश्यप ।

---

1. Thus other MSS, पुष्यति A
2. च AB
3. नयेच्च तम् CG
4. च विशेषतः CG
5. शुभं E, H.
6. देवीं B
7. तोषयेत् सर्वदेवताः CG
8. इरावटे BE

Ed. Leiden vv. 676-678a

इरापुष्पैर्भृशं तेन तुष्टि र्मे हि[1] प्रजायते[2] ॥७०४॥

704. I am excessively pleased with him who worships me with Irāflowers in Irā-garden.

शुक्ले वैशाखमासस्य[3] तृतीयायां[4] द्विजोत्तम[5] ।
तस्यां कार्यं[6] यवैर्होमं[7] यवान्दद्याद् द्विजातये ॥७०५॥

705. On the third of the bright (half) of the month of Vaiśākha, sacrifice should be performed with barley, and barley should be given to a Bhāhmaṇa.

यवैः सम्पूजयेद् विष्णुं भोक्तव्याश्च तथा यवाः ।
गङ्गासम्पूजनं कार्यं तस्मिन्नहनि काश्यप[8] ॥७०६॥

706. One should worship Viṣṇu with barley and also eat barley. O descendant of Kaśyapa, the worship of Gaṅga should be performed on that day.

जपं होमं[9] तथा श्राद्धं तपः स्नानादिकं चयत्[10] ।
अक्षयं सर्वमुद्दिष्टं दानं स्वल्पमपि ध्रुवम् ॥७०७॥

1. देहे B
2. --मेऽभिप्रजायते H तुष्टिमेत्यस्य स द्विज CG. इरामञ्जरीपूजा add A, नीलमते—BDEF, इति श्री--H, इति श्रीनीलमतपुराणे चैत्र्यामिरामजरीपूजावर्णनं नाम षट्त्रिंशोऽध्यायः C then follows नील उवाच verbom ABDEFH
3. वैशाखे शुक्लमासस्य CG
4. तृतीयस्यां H
5. यवानुत्पादयामास कृतं च कृतवान् युगम् add ed Leiden
6. तस्यां कार्यो CG
7. होमो CG
8. ब्रह्मलोकात् त्रिपथगांपृथिव्यामवतारयत् add ed Leiden
9. जपो होमो CG
10. तत् E

Ed. Leiden v.v. 678b-682

707. Muttering of god's name, sacrifics, oblationsto the manes, penance, bath etc. all are said to be imperishable (on that day). Even a little charity beeomes perpetual.

सिन्धुतीरे प्रयत्नेन द्वितीयायामुपोषितैः[1] ।
तृतीयायां[2] च कर्तव्यं[3] मनुजैश्च[4] यथाविधि[5] ॥७०८॥

708. Having undergone fast on the second (day), (these rites) should be performed strenuously by men on the third day, on the bank of the Sindhu.

विष्णुदेवो जगन्नाथो ब्रह्मन् प्राप्ते[6] कालौ युगे ।
अष्टाविंशत्तमे[7] भावी[8] बुद्धो नाम जगद्गुरुः ॥७०८॥

पुष्ययुक्ते निशानाथे वैशाखे मासि काश्यप ।
तस्मात् कालादथारभ्य काले भाविन्यतः परम् ॥७१०॥

709-710.a O Brahman, the god Viṣṇu, the lord of the world, shall be (born as) the preceptor of the world, Buddha by name, at the time when the Puṣya is joined with the moon, in the month of Vaiśāṣha, in twenty eighth Kali Age.

---

1. Thus DEF, उपोषित: other MSS.
2. तृतीयेयं BF, तृतीयस्यां H
3. कर्तव्या ABF
4. Thus A, तु other MSS.
5. अक्षयतृतीया add A, नीलमते--BDEF, इति श्री—H, इति श्री नीलमतपुराणेऽक्षयतृतीयावर्णनं नाम: सप्तत्रिंशोध्याय: C Then follows नील उवाच verb om. ABDEFH
6. Thus A, प्राप्ते ब्रह्मन् other MSS.
7. विंशतिमे CG
8. Thus CG, भागे other MSS.

Ed. Leiden v.v. 683-685

शुक्ले सम्पूजनं तस्य यथा कार्यं तथा शृणु ।
सर्वौषधैः सर्वरत्नैः[1] सर्वगन्धैस्तथैव च[3] ॥७११॥

बुद्धार्चास्नापनं[4] कार्यं शाक्योक्तै[5] र्वचनैस्तथा ।
सुधासिताश्च कर्तव्या शाक्यावासाः प्रयत्नतः ॥७१२॥

710b-12. Listen from as to how his worship should be performed in the bright-half, from that period onwards, in uture. The imege of Buddha should be bathed (with water renderd holy) with all medicinal herbs, all jewels and all scents, in accordance with the sayings of the Śākyas. The dwellings of the Śākyas (i.e. Vihāras) shoule be whitewashed with care.

क्वचिच्चित्रयुता कार्या चैत्या देवगृहा[6]स्तथा ।
उत्सवं[7]च तथा कार्यं नटनर्तकसङ्कुलम्[8] ॥७१३॥

713. Here and there, the Caityas—the abodes of the god—should be provided with paintings. The festival, swarming with the actors and the dancers, should be celebrated.

शाक्यानां पूजनं कार्यं चीवरा[9]हारपुस्तकैः ।
सर्वमेतद् भवेत्कार्यं यावत्प्राप्ता भवेन्मघा ॥७१४॥

---

1. सर्वौषधिसमायुक्तैः CG
2. सर्वगन्धैः सर्वरत्नैः BDEF
3. सुभावितैः CG
4. स्नपनं DH, स्थापनं CG
5. शास्त्रोक्तैः H
6. देवालयाः CG
7. तत्सवं DE एतत्सर्वं CG
8. Fourth pāda om. BDEF
9. गोवस्त्राहार—CG चीवराहा—H, दीनाराहार—A, Emended

First second and third pādas of this verse om. BDEF

Ed. Leiden v.v. 686-689

714. The Śākyas should be honoured with Cīvara (the dress of a Buddhist mendicant), food and books. All this should be done till the advent of Maghā.

दिनत्रयं च कर्तव्यं नैवेद्यं विधिवद् द्विज ।
पुष्पवस्त्रादि पूजा च दानं दीनजनस्यच[1] ॥७१५॥

715. O twice-born, eatable offerings should be made for three days. Worship with flowers, clothes etc. and charity for the poor (should continue for three days).

पौर्णमासीं[2] तु[3] सम्प्राप्य वैशाखस्य द्विजोत्तम ।
मधुयुक्तै[4]स्तिलैः[5] कार्यं तदा[6] ब्राह्मणपूजनम् ॥७१६॥

716. O best among the twice-borns, the Brāhmaṇas should be worshipped with sesame, on the full moon day of Vaiśākha. Bath, sacrifice, and funeral rites (shoulh be performed) with sesame.

तिलैः स्नानं तिलैर्होमं[7] तिलैः श्राद्धं तथैव च ।
मात्रादानं[8] तु कर्तव्यं दीपदानं, सुरालये ॥७१७॥

तिला देयाश्च विप्रेषु दक्षिणायां[9] तथा तिला ॥७१८॥

---

1. नीलमते बुद्धजन्माहः add DEF, इति श्री---H, बुद्धजन्मदिनं A, इति श्री नीलमतपुराणे वैशाखशुक्ले पुष्ययोगे बुद्धजन्माहोत्सववर्णनं नाम अष्टत्रिंशोऽध्यायः। Then follows नील उवाच verb om ABDEFH
2. पौर्णमास्यां H
3. Thus other MSS, च A
4. सान्नयुक्तैः BDGF, मानयुक्तैः E
5. द्विजैः DEF
6. तथा A
7. होमः CG
8. मात्राचारं A
9. Thus A, भक्षणीयाः other MSS.

Ed. Leiden v.v. 690-692

717-18. Gift of wealth should be made and earthen lamps should be given for the temple. Sesame should be offered to the Brāhmaṇas and sesame should also be eaten.

माघकृष्णे द्विजश्रेष्ठ एकादश्यामुपोषितैः[1] ।
द्वादश्यां सकलः कार्यो वैशाखोक्तो[2] मया विधिः ॥७१९॥

719. O best among the twice-borns, on 11th of the dark half of Magha, one should undergo fast and on the 12th, should do everything prescribed by me in connection with Vaisakha.

वैशाख्यां पौर्णमास्या[3]न्तु ब्राह्मणान् सप्त पञ्च वा[4] ।
क्षौद्रयुक्तैस्तिलैः कृष्णै[5]रर्चयेदथवेतरैः ॥७२०॥

720. On the full moon day of Vaiśākha, one should worship seven or five Brāhmanas wilh Black or other sesame mixed with honey.

प्रीयतां धर्मराजेति[6] यदा[7] मनसि वर्तते ।
यावज्जीवं कृतं[8] पापं तत्क्षणादेव नश्यति[9] ॥७२१॥

721. Whatever sin is committed throughout life is destroyed that very moment, when (the thought) "May Dharmarāja be pleased" comes to the mind.

---

1. उपोषितः ABDEFH
2. —वैशाखोक्तो H, सकलं कार्यं वैशाखोक्तं CG
3. Thus H CG, पूर्णमास्या other MSS.
4. पञ्च सप्त वा BDEF
5. Thus other MSS., पुष्पैः A
6. धर्मराट् चेति CG
7. यथा BDEF
8. Thus BCCEFGH, यावज्जीवकृतं A
9. प्रविनश्यति C, इति ज्येष्ठी add A, नीलमते ज्येष्ठी BDEF, इति श्री—H, In CG occurs one verse more and then follows इति श्रीनीलमतपुराणे ज्यैष्ठीवर्णनं नाम चत्वारिंशोऽध्यायः। Then follows नील उवाचः verb om. in ABDEFH

Ed. Leiden v.v. 693-695

ओषधीनां ततो राजा संपक्वो भवते यव:[1] ।
यवान्नेन तदाभ्यर्च्या देवताः पितरस्तथा ।।७२२।।

722. Thereafter, barley—the king of the medicinal herbs becomes ripe. The gods and the manes should be worshipped then with barley-grains.

ततो[2]ऽनुलिप्तः स्रग्वी च नववासा[3] यथाविधि ।
वाद्यब्राह्मणघोषेण यवान्नं प्राशयेन्नरः[4] ।।७२३।।

723. Then, one—anointed, garlanded and dressed in new clothes—should eat barley-food in proper procedure, amidst sounds of musical instruments and the Brāhmanas.

ज्यैष्ठ्यां तु समतीतायां या द्विजेन्द्राष्टमी भवेत् ।
तस्यां विनायकः पूज्यः सगणो मोदकोत्करैः ।। ७२४ ।।

भक्ष्यैर्माल्यैस्तथा गन्धैः कुल्माषेण च भूरिणा ।
गीतवाद्यैः[5] सुमधुरैः ब्राह्मणानां च तर्पणैः ।।७२५।।

724-25. O lord of the twice-borns, on the 8th after (the full moon day of) Jyeṣtha, one should worship Vināyaka along with his gaṇas, with heaps of sweetmeats. sweet vocal and instrumental music and pleasing of the Brāhmaṇas.

सर्वासु वा[6] पूजनीयास्त्वष्टमीषु विनायकः ।
कार्यसिद्धिमवाप्नोति सोपवासस्तु पूजयेत्[7] ।।७२६।।

---

1. कुरुते यवाः BD
2. अतो A
3. वनवासो A, वरवासा H
4. द्विजान् CG, यवाग्रायणम् add A, नीलमते--BDF, सम्यगभ्यर्च्यऽतो तत्र यवान्नं प्राशयेत् स्वयम् CG, इति श्रीनीलमते यवाग्रायणवर्णनं नाम एकचत्वारिंशोध्यायः । नील उवाच C
5. Thus ACG, गीतैर्वाद्यैः other MSS.
6. वै BDEF
7. विनायकाष्टमी AE, नीलमते विनायकाष्टम्यः BDF

Ed. Leiden v.v. 696-700

726. Or Vināyaka should be worshipped on all the 8th days. Worshipping him after undergoing fast, one gets success in undertakings.

आषाढमासे[1] संप्राप्य[2] स्वातियोगं[3] तथा द्विज[4] ।
वायुसम्पूजनं कार्यं गन्धैर्माल्यैर्द्विजोत्तम[5] ॥७२७॥

भूरिणा परमान्नेन सक्तुना विविधेन च ।
सुमनोभिर्विचित्रैश्च कुसुमैश्च तथापरैः[6] ॥७२८॥

727-28. O best among the twice-borns, when the conjunction of Svāti constellation takes place in the month of Āṣāḍha then should be worshipped the god Wind, with scents, garlands, much rice cooked in milk, various types of ground parchedgrains, varied flowers and other blossoms.

आषाढ[7]शुक्लपक्षान्ते कर्तव्यं दिनपञ्चकम् ।
देवप्रस्वापने ब्रह्मन्नुत्सवं[8] गीतवादितैः[9] ॥७२९॥

729. O Brahman, in the end of the bright half of Āṣāḍha, a festival with vocal and instrumental music should be celebrated for five days, for bringing sleep to the god.

---

1. Thus CG, आषाढयोगं BDEF, आषाढयोगे H
2. संप्राप्ते A
3. स्वातियोगे ABDEFH
4. तथैव च A
5. द्विजार्चनम् BDEF
6. स्वातियोगः add A नीलमते--BDEF, इति श्री—H, इति श्रीनीलमतपुराणे आषाढमासे स्वातियोगवर्णनं नाम त्रिचत्वारिंशोध्यायः । नील उवाच C
7. आषाढे--E
8. Thus H, उत्सवैः CG, तत्सवं A
9. गीतवादित्रैः H

एकादशीचतुर्दश्योर्धनहोत्रं[1] च कारयेत् ।
निशाद्वयं[2] ततः कार्यं[3] रात्रिजागरणं तथा ॥७३०॥

730. On the 11th and the 14th, Dhanahotra should be performed and vigil hould be observed for two nights. The Brāhmaṇas and the Satvatas should be worshipped on the 12th and the 15th.

द्वादश्यां पञ्चदश्यां च द्विजसात्वतपूजनम् ।
त्रयोदश्यां च कर्तव्यं प्रेक्षादानं यथाविधि ॥७३१॥

धनं[4] च शक्त्या दातव्यं ये नरा रङ्गजीविनः ॥७३२॥

731-32. On the 13th, gifts for dramatic performances should be made in a proper procedure and money should be given, as far as the means may allow, to those who earn their living through stage.

हिंसात्मकै[5]स्तु किं तस्य यज्ञैः कार्यं[6] महात्मना ।
प्रस्वापे च प्रबोधे च पूजितो[7] येन केशवः[8] ॥७३३॥

733. What has he—the high minded—to do with violent sacrifices, by whom Keśava has been worshipped in the ceremonies of Causing Sleep and Awakening ?

---

1. Emended, धनहोरां D, धनहोरं AEF, राज्यहोमं H, बलिहोमं CG
2. निशाद्वये CG
3. अत्र कार्यं च CG
4. दानं EH
5. होमात्मकैः BDEF
6. किं कार्यं तस्य यज्ञैः H
7. पूजितं F
8. नीलमते प्रस्वापनम् add ABDF, इति श्री---H

Ed. Leiden v.v. 704-706

आषाढान्ते वैश्वदेवं नक्षत्रं प्राप्य पण्डितः ।
विद्वान्[1] सम्पूजयेद् देवान् वायूक्तविधिना तथा[2] ॥७३४॥

734. When the conjunction of Vaiśvadeva constellation takes place in the end of the month of Āṣāḍha, the learned scholar should worship the gods, in the manner prescribed in the case of Wind-god.

सक्तन् गोरस[3]संमिश्रान् ब्राह्मणेभ्यः प्रदापयेत् ।
हिमं च शर्करां चैव शाकं हरितकं तथा ॥७३५॥

छत्रोपानहमाल्यादि दक्षिणायनवासरे ।
वारिधान्य[4]श्च सम्पूर्णा शीततोयेन[5] मानद[6] ॥७३६॥

735-36. On the occasion of Dakṣiṇāyana (the southern progress of the sun), one should give to the Brāhmaṇas, ground parched-grains mixed with milk, snow, sugar, green vegetables, umbrella, shoes, garlands and water receptacles full of cold[1] water.

आषाढ्यां समतीतायां यदा स्याद् द्विज रोहिणी ।
तदा च[7] कश्यपः पूज्यो देशस्यास्य प्रवर्तकः ॥७३७॥

---

1. विश्वान् BDE
2. तदा E, नीलमते वैश्वदेवपूजा add BDEF, इति—H,—वर्णनम् G, उत्तराषाढपूजा A, इति श्रीनीलमतपुराणे वैश्वदेवनक्षत्रेविश्वेदेवपूजावर्णनं नाम पंचचत्वारिंशोऽध्यायः C. Then follows नील उवाच verb om. ABDEFH.
3. गोमय—A
4. वारिधान्यैः B
5. Thus CEH, श्वेततोयेन other MSS.
6. नीलमते दक्षिणायनम् add BDF.
7. Thus A, तु other MSS.

गन्धमाल्यादि नैवेद्यै ब्राह्मणानां च पूजया ।[1]
तस्मिन्नहनि रोहिण्यः पूजनीयाः सवत्सकाः[2] ॥७३८॥

737-38. O twice-born, Kaśyapa—the founder of this country—should be worshipped at the appearance of Rohiṇī constellation after (the full moon day) of Āṣāḍha, with scents, garlands, eatable offerings and worship of the Brāhmaṇas Rohiṇī cows along with their calves should be worshipped on that day.

ततस्तु श्रावर्णीं प्राप्य वितस्तासिन्धुसङ्गमे ।
स्नात्वा संपूजनं कार्यं[3] देवदेवस्य शार्ङ्गिणः ॥७३९॥

739. At the appearance of Śrāvaṇī, one should take bath in the confluence of the Vitastā and the Sindhu and worship the bow-holder (viṣṇu)—the god of the gods.

स्वस्तिवाच्य[4] द्विजान्[5] पश्चात् क्रीडितव्यं यथासुखम् ।
विशेषवच्च भोक्तव्यं तत्र वै[6] द्विजपुङ्गव ॥७४०॥

740. After calling upon the Brāhmaṇas to pronounce benedictory formulae, one should play to get pleasure and should take there, verily, special meals.

सामध्वनिश्च श्रोतव्यस्तस्मिन्नहनि काश्यप[7] ।
क्रीडितव्यं विशेषेण कुमारीभिस्तथा जले[8] ॥७४१॥

---

1. पूजनम् C
2. इति नीलमते कामधेनुपूजा add A
3. Thus AH, कृत्वा other MSS.
4. स्वस्तिवाच्यं B, स्वस्तिवाद्यान् A
5. द्विजैः B
6. तत्रैव BEF, यत्र वै G
7. कश्यप A
8. Last two pādas om BD

Ed. Leiden v.v. 711-714

741. The chantings of the Sāmaveda should be listened to on that day, and the unmarried girls should specially play in the water.

श्रवणर्क्षमनुप्राप्ते चन्द्रमस्यथ काश्यप ।
स्नातस्य श्रवणे पुष्टिः सर्वास्मिन् सर्वदा भवेत्[1] ।।७४२।।

742. At the time, when the moon is united with Śravaṇa constellation, one who takes bath, gets prosperity in all places and times.

श्रावण्यां समतीतायां या स्यात् कृष्णाष्टमी ।
तस्यामुत्पद्यते देवो मानुष्ये मधुसूदन ।।७४३।।

भारावतारणार्थं[2] हि तस्यान्तु द्विजसत्तम ।
अष्टविंशे तु[3] सम्प्राप्ते द्वापरान्ते च नः[4] श्रुतम् ।।७४४।।

743-44. O twice-born, the god Madhusūdana is born in the human world for removing the burden (of the earth) on the dark eighth following the (full moon day of (Śrāvaṇa, in the end of the 28th Dvāpara. O best among the twice-borns, it is heard by us.

तत्राहनि तु कर्तव्यं तस्मात्कालात्तदा[5] परम् ।
पूजनं देवदेवस्य देव्याश्चैव यथा विधि ।।७४५।।

745. From that period onwards, the worship of the god of gods and the goddess should. be performed on that day, in the proper manner.

---

1. नीलमते श्रावणी add ABDF, इति श्री–H. First two pādas om. BD
2. भारावतारे तीर्थं हि BDF, भारावतारी तीर्थं हि E, भारावतारणार्थाय H. धर्मसंरक्षणार्थं हि C
3. अष्टाविंशति BDEF
4. इति CG
5. ––सदा––BCD, कालादथापरम् E,––ततः––H

Ed. Leiden v.v. 715-718

देवकी च यशोदा च तथा[1] पूज्ये[2] द्विजोत्तम ।
गन्धैर्माल्यैस्तथा भक्ष्यैर्यवगोधूमसम्भवैः[3] ॥७४६॥

सगोरसैर्भक्ष्यभोज्यैः फलैश्च विविधैस्तथा ।
एवं सम्पूजनं कृत्या रात्रौ कुर्यान्महोत्सवम् ॥७४७॥

746-47. O best among the twice-borns, Devakī and Yaśodā should be worshipped on that day, with scents, garlands, eatables made of barley and wheat, eatables mixed with cow's milk, and fruits of various types. Having performed worship thus, a great festival should be celebrated at night.

तथा[4] जागरणं कार्यं[5] नवम्यां द्विजसत्तम ।
अनर्काभ्युदिते[6] काले स्त्रियः कौसुम्भवाससः ॥७४८॥

नदीतीरे शुभे रम्ये विविक्ते सरसि[7] त्वथ[8] ।
नयेयुः प्रतिमाः सर्वा गीतवाद्यैर्मनोहरैः ॥७४९॥

748-49. In the morning, before the rising of the sun, women dressed in clothes dyed with safflowers, should carry all the images, amidst charming sounds of vocal and instrumental music, to the beautiful and auspicious bank of a river or a lonely lake.

---

1. तदा BE
2. देवकीं च यशोदां च तथा पूजेत् G
3. यवगोधूमसर्षपैः E, भव्यैः गोधूमसम्भवैः H
4. First two pādas of this verse om. in HCG रात्रि. जागरणं BDEF
5. कुर्यात् B
6. अनर्केऽभ्युदिते Ed Leiden
7. सरसे CG
8. अपि वा BCGH

Ed. Leiden v.v. 719-721

तस्मिन्नहनि भोक्तव्यं भोजनं यवसंभवम् ।
युक्तमिक्षुविकारैश्च मरिचैश्च घृतेन च[1] ॥७५०॥

750. Eatables made of barely along with preparations of sugarcane, pepper and purified butter should be eaten on that day.

ततः पञ्चदशीं प्राप्य कृष्णां पित्र्यर्क्षसंयुताम् ।
पितॄणां तर्पणं कार्यं श्राद्धं कार्यं प्रयत्नतः ॥७५१॥

751. Then, on the dark fifteenth united with Pitṛ constellation, satiating liabations of water and other oblations for the manes should be offered with effort.

सुभाषितो[2] बर्हिषदः अग्निष्वात्ता[3]स्तथैव च ।
क्रव्यादश्चोपहूताश्च आज्यपाश्च सुकालिनः ॥७५२॥

सर्वे पितृगणा पूज्या पुष्पधूपान्नसम्पदा ।
तिलैः कार्याः प्रयत्नेन श्राद्धस्तस्मिन् द्विजोत्तम[4] ॥७५३॥

752-53. Subhāṣits, Barhiṣads, Agniṣvāttas, Kravyāda, Upahūtas, Ājyapās and Sukālins, all these hosts of Fathers should be worshipped with a great quantity of food, incense and flowers. O best among the twice-borns, funeral rites with sesame should be performed with effort, on that day.

---

1. नीलमते श्रीकृष्णजन्मदिनम् add A, नीलमते कृष्णजन्माहः BDEF, इति श्रीजन्माष्टम्याहः H, इति श्रीनीलमतपुराणे कृष्णजन्माहवर्णनं नाम एकोनपंचाशतमोऽध्यायः C Then follows नील उवाच· verb om ABDEFH.

2. Thus BCDEFH, सुभाषिता A, सुभास्वतो G.

3. अग्निष्ठाताः C, अग्निष्वात्तः F, अग्नित्ताः A

4. नीलमते मघामावस्या AEF,—माघामावस्या D—माघामावसी B, इति श्रीनीलमतपुराणेमघामावस्यावर्णनंनाम एकोनपंचाशतमो (पंचाशतमो ?) ध्यायः C Then follows नील उवाच, verb om. BDEFH

Ed. Leiden v.v. 722-725

प्रोष्ठपदस्य[1] मासस्य शुक्लपक्षे दिने दिने ।
पूजनीयो महेन्द्रश्च सती[2] देवी तथैव च ॥७५४॥

754. On everyday of the bright-half of the month of Prausṭha, Mahendra and the goddess Satī (Śecī?) should be worshipped.

पटे[3] कृत्वा[4] तु सर्वेण यथाशक्त्या द्विजोत्तम ।
दैवज्ञेनैव विधिना स तु पूज्यो[5] महीक्षिता ॥७५५॥

755. O best among the twice-borns, painted on the cloth, he should be worshipped in the proper manner by kings as indicated by an astrologer.

ब्राह्मणानां तु कर्तव्या[6] पूजा च[7] गोप्रजीविना ।
भक्ष्यैरन्नैः[8] फलैर्मूलैः[9] रत्नैर्वस्त्रैः[10] सधूपकैः ॥७५६॥

756. The cowherd should worship the Brāhmaṇas with eatables, grains, fruits, herb-roots, jewels, clothes and incense.

महेन्द्रः सगणः पूज्यः सायुधश्च सवाहनाः ।
इन्द्रपक्षस्य या मध्ये शुक्ला ब्राह्मण पञ्चमी ॥७५७॥

---

1. Thus A प्रोष्ठपादस्य other MSS.
2. शची G
3. पटी E
4. Thus G, कृतं other MSS.
5. दैवज्ञार्थविधानेन पूजा कार्या G
6. Thus A, कर्तव्यं other MSS.
7. Thus A, सम्पूजनं other MSS.
8. रत्नैः H
9. फलैर्वस्त्रमूलैः A
10. अन्नैः A

Ed. Leiden v.v. 726-729

तस्यां मे पूजनं[1] कार्यं गन्धधूपान्नसम्पदा ।
माल्यैर्वस्त्रोपहारैश्[2]च वह्निब्राह्मणतर्पणैः ॥७५८॥

प्रेक्षादानैश्च विविधैं भूमिशोभाभिरेव च ।
तस्मिन्नेवाह्नि कर्तव्यं[3] स्थाननागस्य[4] चाप्युत[5] ॥७५९॥

757-58. Mahendra should be worshipped along with his host (of warriors), the weapons and the mount. O Brāhmaṇa, on the bright fifth of Indra's fortnight, my worship should be performed with a great quantity of scents, incense and grains, gifts of garlands and clothes, gratification of the sacred fire and the Brāhmaṇas, gifts of various sorts for the dramatic performances, and decorations of the earth. The worship of the local Nāga also should be performed on that very day.

ततस्त्वनन्तरं पक्षे[6] श्राद्धं कार्यं दिने दिने ।
चतुर्दशीं वर्जयित्वा श्यामाकैस्तु विशेषतः ॥७६०॥

760. In the fortnight following that (Indra Pakṣa), Śrāddha should be performed everyday specially with Śyāmāka corn except on the fourteenth.

शस्त्रेण निहता ये तु तेभ्यो धर्म्या चतुर्दशी ।

761a. The fourteenth (day of the fortnight) is prescribed for those who were killed by means of weapons.

सर्वं पक्षं[7] भवेच्छ्राद्धमेवमेवाह केशवः ॥७६१॥

1. Thus DEF, सम्पूजनं ACGH
2. Then ABDEFH, माल्य—CG
3. कर्त्तव्या all MSS.
4. Thus CDH, स्थाननागस्य E, स्थानं नागस्य A
5. चाप्यथ A
6. पक्षं BFB
7. सर्वपक्षं G

Ed. Lieden v.v. 730-733

त्रिभागहीनं पक्षं वा त्रिभागमन्त्यमे[1]व वा ।
वित्तशक्त्या तु कर्तव्यं त्रयोदश्यां सदैव हि[2] ॥७६२॥

761b-62. Keśava has stated that Śrāddha may be performed for the whole of the fortnight or it may be performed in the fortnight excepting its (first) one-third part, or in the last one-third. On the thirteenth, however, Śrāddha must be performed necessarily.

परपाकरतिर्यो वै योऽपि चैवाधनो भवेत् ।
कर्मजीवी भवेद् यो वै[3] तेनापि द्विजपुङ्गव ॥७६३॥
यथाकथञ्चिच्छ्राद्धं च कर्तव्यं स्यात् त्रयोदशीम् ।
अत्र गाथा पितृगीता निबोध, गदतो मम ॥७६४॥

763-64. O best among the twice-borns, even he who lives on the bread supplied by others, he who has got no wealth and he who is a manual labourer, should, somehow or other, perform the funeral rites on the thirteenth. Know while I am saying. Here is the verse sung by the Fathers.

अपि नः स कुले[4] जायेद्[5] यो नो[6] दद्यात् त्रयोदशीम् ।
पायसं मधुसंमिश्रं वर्षासु च मघासु च[7] ॥७६५॥

765. Will he be born in our family who may offer to us milk mixed with honey, on the thirteenth in Varṣā and Maghā?

---

1. चान्त्यम् G
2. Thus other MSS., तु A
3. वा BEF.
4. Thus AB, संकुलो other MSS.
5. Thus CDF, जातो B, जयेद् other MSS.
6. न A
7. नीलमते श्राद्धपक्ष: add BDEF, इतिश्री—H, इतिश्रीनीलमतपुराणे श्राद्धपक्षवर्णनं नाम द्विपंचाशत्तमोऽध्याय: C Then follows नील उवाच verb om. ABDEFH.

Ed. Leiden v.v. 734-737

श्राद्धपक्षस्य या मध्ये[1] चतुर्थी द्विजसत्तम ।
दिक्पालपूजनं[2] कार्यं प्रौष्ठपद्यां सदा[3] बुधैः ॥७६६॥

766. O best among the twice-borns, the wise men should always worship the guardians of the quarters on the 4th which falls in the fortnight of the funeral rites in the month of Prausṭhapada.

आयुधानि च पूज्यानि रात्रौ दुर्गागृहे तदा[4]
स्नात्वा प्रभाते सम्पूज्य[5] सर्वाण्युक्तानि काश्यप[6] ॥७६७॥

भुक्त्वा तु शान्तिः कर्तव्या किञ्चिच्छिष्टे दिवाकरे ।
नीराजनाख्या सा ज्ञेया[7] शालिहोत्रविचक्षणैः ॥७६८॥

ज्योतिषां पालकाद्याश्च[8] कल्पेष्वाथर्वणेषु च ।
अतः परं पूजनीया जना ये रङ्गजीविनः[9] ॥७६९॥

767-69. Weapons should be worshipped at night in the temple of Durgā. O descendant of Kaśyapa, after taking bath in the morning and after worshipping all (the things) mentioned above, one should take one's meals and perform expiatory rites when the sun is just to set. This (ceremony) called Nīrājana should be known by those who are adept in

---

1. मध्ये च G
2. दिक्कालपूजनं A
3. त्वया G
4. Thus A, तथा other MSS.
5. ज्य om. A
6. कश्यप A
7. Thus ABDEF, विज्ञेया CGH
8. पालका ये च Ed, Leiden
9. नीलमते महानवमी add ABDFH, ओं नमः H, इति श्रीनीलमतपुराणे महानवमीवर्णनं नाम त्रिपञ्चाशतमोऽध्यायः C Then follows नील उवाच verb om. ABDFH

Ed. Leiden v.v. 738-741

the performance of Śālihotra and are thus the preservers of astronomy (described) in the Kalpa (Sūtras) and the works related to the Atharvaveda. After this, should be worshipped those who earn their living by means of stage-performances.

कन्यामध्यमनुप्राप्ते सहस्रकिरणे द्विज ।
रात्र्यन्ते सोपवासेन पूज्योऽगस्त्यो महामुनिः[1] ।।७७०।।

पूर्णकुम्भैः[2] सकूष्माण्डैर्यवैर्धान्यैर्घृतेन च ।
जातीपद्मोत्पलैः शुभ्रैश्चन्दनेन सितेन च ।।७७१।।

धेन्वा वृषेण वस्त्रैश्च रत्नैः सागरसम्भवैः[3] ।
छत्रोपानहदण्डैश्च पादुकाभिस्तथैव च ।।७७२।।

भूरिणा परमान्नेन फलमूलैः सुशोभनैः ।
अन्नप्रकारैर्भक्ष्यैश्च वह्निब्राह्मणभोजनैः[4] ।।७७३।।

संवत्सरं तु त्यागेन फलस्यैकस्य काश्यप ।
अगस्त्यपूजां कृत्वैवं[5] दैवज्ञं पूजयेत् ततः[6] ।।७७४।।

770-74. O twice-born, when the thousand-rayed (sun) is united with Kanyā constellation then one should observe fast and worship the sage Agastya, with full pitchers, gourds, barley, rice, purified butter, beautiful Jāti, Padma and Utpala (flowers), white sandlewood, cow, bull, clothes, jewels born of the sea, umbrella, shoes, staff, slippers, a great quantity of rice cooked in milk, nice fruits and herb-roots, various sorts of food, eatables, by feeding the fire and the Brāhmaṇas, and by giving up eating of one fruit for the complete year. Having thus worshipped Agastya, one should worship the astrologer.

---

1. Thus A, मुनिर्भवेत् other MSS.
2. पूजाकुम्भैः E
3. First two pādas of this verse om. A
4. corrected from पूजनैः by H, latter reading A
5. कर्तव्यं A, कृत्वैव G
6. तदा BEF

Ed. Leiden v.v. 742-746

तेन संदर्शितं पश्येत्तदागस्त्यं महामुनिम् ।
कामानभीष्टानाप्नोति दृष्ट्वागस्त्यं मुनिं[1] नरः[2] ॥७७५॥

775. Then, one should see the great sage Agastya as shown by him (astrologer). A man gets the desired objects after seeing the sage Agastya.

धान्ये पक्वे सिते पक्षे दिने दैवज्ञचोदिते ।
देवान् पितॄन्समाभ्यर्च्य जलमग्निं द्विजांस्तथा ॥७७६॥

776. When the grains are ripe, one should, on a day of the bright fortnight prescribed by an astrologer, worship the gods, the manes, the water, the fire and the Brāhmaṇas.

द्विजातिपूजनं कृत्वा दैवज्ञस्य च पूजनम् ।
नववस्त्रपरीधानः[3] स्वनुलिप्तः[4] स्वलङ्कृतः ॥७७७॥
स्रग्वी पूर्वमुखः शुक्लो ब्रह्मघोषपुरः सरः[5] ॥७७८॥

777-78. Having worshipped the twice-born and the astrologer, one—dressed in new clothes, well-anointed, well-adorned, garlanded, facing the east, purified, with Vedic recitations in front ....

1. Thus A, अगस्त्यमुनिं other MSS.

2. नीलमते ऽगस्त्यदर्शनम् add BDEF, इति श्री—H, इति श्री नीलमतपुराणेऽगस्त्यदर्शनवर्णनं नाम चतुःपञ्चाशत्तमोऽध्यायः C Then follows नील उवाच, verb om ABDEFH

3. परीधानं A

4. स्वानुलिप्तः A

5. Last two pādas om. A, शृण्वन् वाद्य BDH, शृण्वन् वाक्य E शृण्वन् वाद्यत्रघोषं च गीतशब्दं तथैव च ।
मण्डलं रुचिरं कृत्वा भूमौ पट्टे पटेऽपि वा ॥ CG, added in margin by F

Ed. Leiden v.v. 747-750

मध्ये ब्रह्माण[1]मालिख्य तथा[2]नन्तं च भोगिनम् ।
ततो लिख्येत[3] दिक्पालान् स्वां स्वां दिशमवस्थितान् ॥७७९॥

779. Having painted in the centre Brahmā and hooded Ananta, one should paint (the figures of) the guardians of the directions established in their respective directions.

तेषां तु पूजनं कार्यं धूपमाल्यानुलेपनैः ।
वस्त्रै रत्नैः[4] फलैर्भक्ष्यैर्वह्निब्राह्मणतर्पणैः ॥७८०॥

780. Their worship should be performed with incense, garlands, unguents, clothes, jewels, fruits and eatables, and by gratifying the fire and the Brāhmaṇas.

गुडोपेतास्तथा धाना[5] सर्वसस्यसमुद्भवाः ।
ब्राह्मणानां प्रदातव्या भृत्यबन्धुजनस्य च ॥७८१॥

781. Rice mixed with sugar and the preparations of all (other) grains should be given to the Brāhmaṇas, the servants and the relatives.

स्वयं तु धाना भोक्तव्या रात्रौ न तु दिवा बुधैः ।
दिवा धानासु वसति[6] रात्रौ च दधिसक्तुषु ॥७८२॥

अलक्ष्मीः कोविदारेषु कपित्थेषु सदा स्थिता[7] ॥७८३॥

---

1. ब्राह्मणम् DEFH
2. ततो ABDEGH
3. विलिख्येत् E, लेख्यात् A
4. Thus other MSS., अन्नैः A
5. दानाः C
6. वसती A
7. सदार्थिता C.· धनचतुर्थी add F, नीलमते धनदचतुर्थी ABDE: इति श्री—H, इति श्रीनीलमतपुराणे धनदचतुर्थीवर्णनं नाम पंचपंचाशत्तमोऽध्यायः C. Then follows नील उवाच. verb only in CG

Ed. Leiden v.v. 751-754

782-83. Rice should be eaten by the wise (persons) themselves at night and not in the day time. Absence of wealth dwells during the day in rice, at night in curd and ground parched grains and always in Bauhinia variegata (kovidāra) and Feronia Elephantum (kapittha).

तामेव पञ्चमीं प्राप्य पूज्यो देवो जलेश्वरः।
पूजनीया उमा[1] देवी[2] यथा तु धनदस्तथा[3] ॥७८४॥

784. On the 5th of that (fortnight), the god (Varuṇa)—the lord of the waters—should be worshipped. Just as the goddess Umā is to be worshipped so (should be worshipped) Dhanada.

तामेव षष्ठीं सम्प्राप्य[4] स्नापनीयाः[5] कुमारिकाः[6] ।
अलङ्कृतास्तु कर्तव्या प्राप्य तामेव सप्तमीम् ॥७८५॥

785. The virgins should be bathed on the 6th of that very (fortnight), and should be decorated on the seventh.

आत्मपूजा नरैः[7] कार्या स्त्रीणां बालजनस्य च ।
ततस्तामष्टमीं प्राप्य क्रीडितव्यं यथासुखम्[8] ॥७८६॥

---

1. तु सा HC
2. देव्या HC
3. This verse om. BD, नीलमते वरुणपञ्चमी add AE. नीलमते om. F, इति श्रीनीलमतपुराणे वरुणपञ्चमीवर्णनं नाम षट्पञ्चाशतमोऽध्यायः C. नील उवाच C
4. पञ्चमीं प्राप्य BDF
5. स्नपनीयाः AGH, पूजनीयाः E
6. कुमारकाः BDEF
7. जनैः G
8. तथा सुखम् DF

Ed. Leiden v.v. 755-757

सिन्दूरकर्दमाक्ताङ्गैर्नृत्यवाद्यपुरःसरम्[1] ।
स्नात्वा संपूजनीया तु देवी नाम्ना[2] त्वशोकिका ॥७८७॥

786-87. Men should decorate themselves and also the women and the children. With their bodies anointed with moist vermillion-powder, they should play for pleasure amidst dances and instrumental music, on the 8th of the same (fortnight). After taking bath, one should worship the goddess named Aśokikā.

शय्यासनं निवेद्यं स्यात्[3] सोत्तरच्छदनं[4] शुभम् ।
पुष्पान्नधूपनं[5] सर्वं भोक्तव्यं गुडसंयुतम् ॥७८८॥

788. Flowers, food, incense, bed and seat along with the upper blanket should be offered. Food mixed with sugar should be eaten.

उमायाः पूजनं कार्यं तस्यां[6] सौभाग्यमीप्सुना ।
धूपान्नदीपमाल्यैश्च[7] दध्यन्नेन[8] गुडेन वा[9] ॥७८९॥

कुसुम्भलवणाभ्यां वा[10] कुङ्कुमाञ्जनकङ्कणैः[11] ।
आराममथगत्वा तु[12] तोयवृक्षोपशोभितम्[13] ॥७९०॥

---

1. नृत्यवाद्यपुरःसरैः BDEFG
2. Thus AH, नाम other MSS.
3. च G
4. —छादनं G
5. पुष्पार्घ्य—G
6. तस्याः AH
7. धूपान्नैः—H
8. Thus A अघातेन BDEF, आर्द्रकेण H,
9. धूपार्घ्यदीपमाल्यैश्च भुंजीतान्नं गुडान्वितम् add G
10. —लवणाद्यैश्च BDEF
11. Thus A, कांकितैः BDE
12. om. E.
13. नीलमते गोधूमनवमी add ABDEF, इति श्रीनीलमतपुराणे गोधूमनवमीवर्णनं नाम सप्तपञ्चाशतमोऽध्यायः C. Then follows नीलः, उवाच C only.

Ed. Leiden v.v. 758-761

789-90. He who desires to get prosperity, should worship Umā on that day, with incense, food, earthen lamps, garlands, curd, grains or sugar, or safflowers and salt or saffron, collyrium and bangles. After going to a garden adorned with water (falls) and trees............

ततस्तोये तु[1] वैतस्ते स्नातव्यं[2] दिनसप्तकम्[3] ।
दशम्यादौ[4] द्विजश्रेष्ठ, यताहारेण[5] साधुना ॥७९१॥

वितस्ताजन्मदिवसात्[6] त्र्यहं पूर्वं त्र्यहं परम् ।
वितस्ताजन्मदिवसं तां च ब्रह्मंस्त्रयोदशीम् ॥७९२॥

791-92. O best among the the twice-borns, then a noble man temperate in food should take bath in the water of the Vitastā, for seven days on 10th etc.—three days before, three days after and on 13th, the birthday of the Vitastā.

पूजनीया वितस्ता स्यात्त[7]था तं[8] दिनसप्तकम्[9] ।
गन्धैर्माल्यैः[10] सनैवेद्यैर्दीपदानैः सुशोभनैः[11] ॥७९३॥

पताकाभि[12]र्विचित्राभी रक्तसूत्रैः सकङ्कणैः[13] ।
फलैश्च विविधैर्ब्रह्मन् वह्निब्राह्मणतर्पणैः[14] ॥७९४॥

---

1. तोयेन H
2. पातव्यं H
3. Thus G, पञ्चकम् other MSS.
4. दशम्यादि G
5. Thus G यदाहारेण other MSS.
6. —दिवसं A
7. च A
8. तद् G, ते C
9. पञ्चकम् C
10. गन्धमाल्यैः BDEF
11. दीपैः धूपैश्च शोभनैः G
12. Thus A, स्नानकाभिः other MSS.
13. च कङ्कणैः ACG
14. वितस्तोत्सवम् A, नीलमते—BDF, इति श्री—H, इति श्री नीलमत पुराणे वितस्तोत्सववर्णनं नाम अष्टपञ्चाशतमोऽध्यायः C. Then follows नील उवाच, verb om. ABDEFH.

Ed. Leiden v.v. 762-765

793-94. O Brāhmaṇa, Vitastā should be worshipped on those seven days, with scents, garlands, eatable offerings, gifts of beautiful earthen lamps, various sorts of flags, red threads, bangles, various sorts of fruits and by gratifying fire and the Brāhmaṇas.

वितस्ताजन्मदिवसाद्यदूर्ध्वं स्याद्[1] दिनत्रयम् ।
प्रेक्षादानं च कर्तव्यं, पूजनीया[2] नटादयः ॥७९५॥

795. Gifts for dramatic performances should be made and actors etc. should be honoured on three days following the birthday of the Vitastā.

वितस्तोत्सवमध्ये तु[3] शुक्ला या द्वादशी द्विज[4] ।
सोपवासो हरिं देवं[5] पूजयेत विचक्षणः ॥७९६॥

796. On the 12th which falls within the festival of the Vitastā, a wise man should observe fast and worship the god Hari.

एषा ध्रुवा विनिर्दिष्टा शेषा कार्या न वा द्विज ।
महती सा विनिर्दिष्टा द्वादशी सर्वदा शुभा[6] ॥७९७॥

797. This is prescribed permanently. Others may or may not be observed. O twice-born, that 12th is regarded as the Great one and is always auspicious.

द्वादशी बुधयुक्ता सा[7] महत्यपि च कीर्त्तिता[8] ।
तस्यां जप्यं[9] तथा[10] स्नानं दानं श्राद्धादिकं तथा ॥७९८॥

---

1. च G
2. तर्पणीया G
3. अपि BDEF, च G
4. यदि H
5. तत्र G
6. Last two pādas om. D
7. बुधसंयुक्ता H, This pāda om. D
8. प्रकीर्तिता G
9. जपं G
10. तदा H

Ed. Leiden v.v. 766-769

प्रोक्तवान् द्वादशगुणं स्वयं मे मधुसूदनः।
बुधश्रवणसंयुक्ता द्वादशी द्विज सा[1] यदि ॥७९९॥

अत्यन्तमहती नाम तस्यां सर्वमथाक्षयम्।

799-800a. The 12th which is united with Budha constellation is also stated to be great. Madhusūdana himself told me that the recital of God's names, bath, charity funeral rites etc. performed on that (12th), become twelvefold. O twice-born, if that 12th is united with Budha and Śravaṇa constellations, that certainly becomes highly great. Every thing performed on that day becomes imperishable.

तस्यां स्नात्वा नरः सम्यङ्ग नदीद्वितयसङ्गमे ॥८००॥

फलमाप्नोति[2] यत् प्रोक्तं संन्निहत्यां रविग्रहे।
उपानहौ तथा छत्रं पूर्णकुम्भं[3] तथैव च ॥८०१॥

वस्त्रयुग्मं तथान्नाद्यं[4] यः प्रयच्छति वै तदा[5]।
शेषाणां यदि[6] चेत् कर्ता श्वेतद्वीपे महीयते[7] ॥८०२॥

800 b-802. One gets the merit which is stated (to be got) at Sannihati, when the sun is eclipsed if one takes bath on that day, in the confluence of two rivers, and gives in charity, at that time, a pair of shoes, umbrella, full pitcher, a pair of clothes, food etc. If one observes the rest (of the 12th days) one is honoured in Śvetadvīpa.

---

1. Thus A, द्विज सा द्वादशी other MSS.
2. प्राप्नोति B
3. पूजाकुम्भं BDG, पूजाकुम्भो E
4. तदान्नाद्यं DE, तथा नद्यां B
5. तथा AGH
6. चापि G
7. नीलमते द्वादश्यः add ABDEF

इति श्री नीलमतपुराणे द्वादशीवर्णनं नाम (एकोनषष्टितमो) ऽध्यायः C

Ed. Leiden v.v. 770-773

सैव चेच्छ्रवणोपेता यदि वा स्याच्च द्वादशी[1] ।
तस्य स्युरिच्छतो[2] लोका यावदिन्द्राश्चतुर्दश ॥८०३॥

803. If that very 12th is united with Śravaṇa constellation, he, if desiring, may have mastery over the worlds for as long as there are the fourteen Indras.

तस्मिन्नहनि संप्राप्य[3] वितस्तासिन्धुसङ्गमात्[4] ।
मृत्तिकां[5] स्नानकाले तु स्नातव्यं सततं तया[6] ॥८०४॥

सङ्गम[7]स्नानजं पुण्यं तेनाप्नोति नरः सदा[8] ॥८०५॥

804-805. Taking out some clay, on that day, from the confluence of Vitastā and Sindhu, one should always take bath with that at the time of taking bath. By that (bath) a man gets always the merit of taking bath in the confluenc.

अथाश्वयुक् चतुर्थ्यां तु देवपूजा[9] विधीयते ।
नवम्युक्तविधानेन सर्वोपकरणादिभिः[10] ॥८०६॥

806. After that, on the 4th of Āśvayuj, the worship of the gods is performed with all means and in the manner told about the ninth day.

---

1. यदि चेत् सा चतुर्दशी B, यदि चेत् स्यात्तु द्वादशी C, यदि स्याज्जात-द्वादशी E

2. इच्छया G

3. संस्नाप्य BDEG, संस्थाप्य C

4. सङ्गमे G

5. Emended from मृत्तिका—ABE, मृद्ग्राह्या स्नानकाले G

6. मया A

7. सङ्गमं EH

8. महाद्वादशी add A, नीलमते—BDE, इति श्री—H, इति श्री नीलमत पुराण महाद्वादशीवर्णनं नाम षष्टितमोऽध्यायः । C Then follows नील उवाच verb om. ABDEFH

9. देवीपूजा G

10. सर्वापकरणादिभिः B

Ed. Leiden v.v. 774-776

पूज्याश्च सुभगास्तत्र याश्च नार्यः पतिव्रताः ।
यासां जीवन्ति नाथाश्च स्वसृप्रभृतयश्च याः ॥८०७॥

807. There should be honoured the lucky ladies whose husbands are alive and who are devoted to their husbands, and also the sisters and others.

यथैवाश्वयुजे मासि तथा माघे च पूजयेत्[1] ।
यथा माघे तथा ज्येष्ठे[2] चतुर्थीत्रितयं तदा[3] ॥८०८॥

808. Just as in the month of Āśvayuj, so in Māgha and so in Jyeṣṭha, (these ladies) should be honoured. Thus, there is the triad of 4th days.

आश्वयुज्यां शुक्लपक्षे[4] स्वातिना संगतः शशी ।
यदा तदोच्चैश्श्रवसः पूजा कार्या प्रयत्नतः ॥८०९॥

809. Uccaiḥśravā should be worshipped with effort, in the bright fortnight of Āśvayuj when the moon is united with Svāti constellation.

पूजनीयाश्च तुरगा यदि[5] स्यान्नवमी द्विज ।
शान्ति[6]स्वस्त्ययनं कार्यं तदा तेषां दिने दिने ॥८१०॥

810. O twice-born, if that (union of the moon with Svāti constellation) be on the 9th, then horses should be worshipped and the rites for their pacification and welfare should be performed daily.

---

1. कारयेत् E
2. ज्यैष्ठे A
3. तथा BDEH

चतुर्थीत्रयम् add A, नीलमते—BDE, इति श्री—H, इति श्री नीलमतपुराणे चतुर्थीतृतीय (त्रितय) वर्णनं नाम एकषष्टितमोऽध्यायः । C Then follows नील उवाच verb om. ABDEH

4. आश्विनस्य सिते पक्षे G
5. यदा E
6. शान्त्य (यं?) F

Ed. Leiden v.v. 777-780

धान्यं भल्लातकं[1] कुष्ठं वचासिद्धार्थकानि च ।
पञ्चरङ्गेण[2] सूत्रेण तथा[3] बध्नीत पण्डितः ॥८११॥

811. (For fastening to the horses) a wise man should piece together paddy (dhānya), Semecarpusanacardium (bhallātaka), Costtus-speciosus (kuṣṭha) Acaruscalamus (vacā) and white mustard (siddhārthaka) by means of a thread of five colours.

वायव्यैर्वारुणैः सौरैः शाक्रैर्मन्त्रैश्च वैष्णवैः ।
वैश्वदेवैस्तथाग्नेयैर्होतव्योऽग्निर्दिने दिने ॥८१२॥

812. Sacrifice should be performed in the fire with the mantras dealing with Vāyu, Varuṇa, Sūrya, Śakra, Viṣṇu, Viśvadevas and Agni.

तुरगा यन्त्रणीयाश्च पुरुषैः शस्त्रपाणिभिः ।
ताडनं वाहनं चैव तदा तेषां विवर्जयेत्[4] ॥८१३॥

813. The horses should be controlled by persons holding weapons in their hands. Beating them and mounting upon them should be prohibited on that day.

ततः शाक्रमनुप्राप्ते नक्षत्रं च[5] निशाकरे ।
कुमुदैरावणौ पद्मः पुष्पदन्तोऽथवामनः ॥८१४॥
सुप्रतीकोऽञ्जनो नीलः पूजनीया गजोत्तमाः ।
नमस्कृत्य यथाऽश्वोक्तं[6] विधिं नागेषु कारयेत्[7] ॥८१५॥

---

1. वल्लातकं A, बल्लातकं H, वलातकं C.
2. पञ्चरङ्गेन AH.
3. तदा BEF
4. Thus A, विसर्जयेत् BDEFH. अश्वदीक्षा add A, नीलमते अश्वदीक्षा DE, इति श्री—नीलमत पु० अश्वदीक्षावर्णनं नाम द्विषष्टितमोऽध्याय: C. Then follows नील:, उवाच add c.
5. Thus A, तु other MSS.
6. Emended form यथास्वोक्तं ABCEFH
7. हस्तिदीक्षा A, नीलमते—BDEF, इतिश्री—H, इतिश्रीनीलमतपुराणे हस्तिदीक्षावर्णनं नाम त्रिषष्टितमोध्याय: C, Then follows नील:, उवाच add C.

Ed. Leiden v.v. 781-785

814-15. When the moon is united with Śakra constellation, then the best elephants—Kumuda, Erāvaṇa, Padma, Puṣpadanta, Vāmana, Supratīka, Añjana and Nīla—should be worshipped. After doing salutation, the same procedure as told with reference to the horses, should be followed in the case of the elephants.

ततोऽष्टम्यां पूजनीया भद्रकाली यथाविधि[1] ।
उपोषितैरर्घधूपैश्च[2] वस्त्रैर्माल्यादिभिस्तथा[3] ॥८१६॥

दीपै रत्नै[4]स्तथा भक्ष्यैः फलैर्मूलैस्तथैव च ।
आमिषैर्विविधैः शाकैर्वह्निब्राह्मणतर्पणैः ॥८१७॥

बिल्वपत्रेण च तथा[5] चन्दनेन घृतेन च ।
पानकैर्विविधाकारैः[6] सस्यैः शिल्पिजनैस्तथा[7] ॥८१८॥

भूशोभाभिर्नृत्तगीतैः रात्रिजागरणेन च ।

816-19a. Then, on the 8th, the artisans, having undergone fast, should worship Bhadrakālī in proper manner, with valuable incenses, garlands, clothes, lamps, jewels, eatables, fruits, herb-roots, meat and various sorts of vegetables, and by gratifying the fire and the Brāhmaṇas. (Bhadrakālī should be worshipped) also with leaves of Bilva, sandlewood, purified butter, drinks of various types and

1. यथाविधिः AC.
2. वस्त्रधूपैः BDEFH, वस्त्रदीपैः C.
3. Thus A, माल्यैर्वस्त्रादिभिर्द्विज BDEF
4. दीपरत्नैः BDEF
5. बिल्वपत्रैस्तथा सम्यक् G
6. विविधाहारैः H
7. सस्यैश्चापि पृथग्विधैः G

Ed. Leiden v.v. 786-789a

grains and by decoration of the earth, dancing and singing, and the observation of vigil at night.

दुर्गागृहे पुस्तकानां पूजा कार्या तथा द्विज ॥८१९॥
स्वकानां[1] शिल्पभाण्डानां[2] कार्या शिल्पिजनेन[3]च ।

819b-20a. O twice-born, the books should be worshipped in the temple of Durgā and the artisans should also worship their tools.

वाद्यभाण्डानि चान्यानि कवचानि तथैव च[4] ॥८२०॥
आयुधानि वरं लब्ध्वा[5] हृष्टो मंगलपूर्वकम्[6] ।
प्राश्नीयाद् दधिसंयुक्तं ब्राह्मणेनाभिमन्त्रितम्[7] ॥८२१॥

आश्रितोर्वाश्रितान् मित्रान् फलवेदविदस्तथा[8] ।
पूजनीयाश्च कर्तव्यं[9] स्त्रीभिर्गत्वा फलद्रुमम्[10] ॥८२२॥

820b-22. Having obtained auspiciously the musical instruments and armours and weapons, one—with pleased mind—should eat food mixed with curd and consecrated with sacred formulae by a Brāhmaṇa, and give that also to dependants, friends and astrologers. The women should go to a fruit-tree and worship...............

---

1. स्वतानां A
2. शिल्पिभांडानां AF
3. Thus other MSS., शिल्पिजनेन A.
4. कवचास्त्राणि चैव हि G.
5. Space for a few letters is left before वरं लब्ध्वा हृष्टो by H. विचारनीम् (विचारणीयम् ?) written on the margin in A, आयुधानि वरं हृष्टो F, तदा वरं लब्ध्वा हृष्टो C, वरं हृष्टे BE.
6. Thus H, मंशलालब्धपूर्वकं A, मङ्गलालब्धपूर्वकं C, मंगलालब्ध-पूजनं BDEF.
7. ब्राह्मणानभिमन्त्रितान् E.
8. मन्त्रफलवेदविदस्तथा F.
9. कर्तव्याः G
10. फलद्रुमाः G

Ed. Leiden v.v. 789b-792

देवीं सम्पूज्य पुष्पादिदीपधूपान्नसम्पदा ।
दत्त्वान्नपिण्डं श्येनस्य तेन पिण्डोभिनन्दितः ॥८२३॥

823. Having worshipped the goddess with flowers, lamps, incense, food etc. one should offer balls of food to an eagle. Gladly accepted by him, the food-ball..........

सुहृत्सम्बन्धिविप्राणां[1] यथाश्रितजनस्य च ।
दातव्यं भोजनं विप्र वसन्तेऽथ शरद्यपि ॥८२४॥

अष्टम्यां वा चतुर्थ्यां वा चतुर्दश्यां[2] तथैव च ।
नवम्यामथ दातव्यं शुक्ले[3] पक्षेऽथ नेतरे[4] ॥८२५॥

यथा[5] पूजा कृता देव्या तथा[6] भोक्तव्यमग्रतः[7] ॥८२६॥

824-26. O Brāhmaṇas, food should be offered to the friends, the relatives, the Brāhmaṇas, and the dependants, in spring and winter, on the 8th or the4th, and on the 14th and the 9th of the bright fortnight and not of the other one. Just as the worship of the goddess was performed, so should the meals be taken in front (of her).

एवमेव प्रदातव्यं गृहदेव्या[8] विचक्षणैः ।
ब्रह्मन् संवत्सरस्यादौ[9] श्येनपिण्डं विवर्जितम्[10] ॥८२७॥

---

1. मित्राणां A
2. चतुर्दश्यां चतुर्थ्यां वा E
3. शुक्ल G
4. अथवेतरे Ed Leiden.
5. तथा A, यस्या G.
6. तस्याः G
7. नीलमते कार्तिकपूजा add ABDEF, इति श्री – H, इतिश्रीनीलमतपुराणे कार्तिकपूजावर्णनं नाम चतुषष्टितमोऽध्याय: C, then follows नील:, उवाच C
8. गृहदेवान् B, गृहदेवा F
9. संवत्सरस्यादि BDEH
10. Thus AH, विसर्जयेत् E

Ed. Leiden vv. 792-796

तच्च देयं गृहे विप्र न तु वृक्षे कदाचन[1] ॥८२८॥

827-28. O Brahman, the wise should, in this very manner, make offerings, excluding the food-ball for the eagle, to the goddess of the house, in the beginning of the year.

That (offering) should be made at home and never under a tree.

यदा पक्वं[2] भवेद् द्राक्षावाटं[3] चैव सुशोभनम्[4] ।
गन्तव्यं स्त्रीसहायेन भृत्यमित्रान्वितेन[5] च ॥८२९॥

829. When the beautiful vine-grove is ripe, one should go there accompanied by one's wife, servants and friends.

अनुलिप्तेन[6] स्नातेन[7] स्रग्विणा च सुवाससा ।
द्राक्षावाटे[8] च[9] सम्पूज्या श्यामा देवी[10] द्विजोत्तम ॥८३०॥

पुष्पधूपान्नभक्ष्याद्यैर्ब्राह्मणानां च तर्पणैः ।
कुल्माषेण प्रभूतेन घृतेन मधुना तथा[11] ॥८३१॥

---

1. Thus A, कथंचन CG नीलमते गृहदेवीपूजा add BD—गृहदेव्याः पूजा F,—गृहदेवपूजा AH. इति श्रीनीलमतपुराणे गृहदेवपूजा-वर्णनं नाम पञ्चषष्टितमोऽध्यायः C.
2. पक्वो CG.
3. द्राक्षावाटो CG.
4. यश्च सुशोभनः CG.
5. भृत्यमित्रान्वयेन BEF.
6. अलिप्तेन A
7. स्नातेन साङ्गरागेन G
8. द्राक्षावटे BD.
9. न G
10. श्रामा देवी D. संपूज्य श्यामा देवी G
11. यथा EF

Ed. Leiden v.v. 797-800a

ब्राह्मणानां च दातव्या द्राक्षा प्रथमतो द्विज ।
ततस्तु पश्चाद् भोक्तव्यं[1] मृद्वीकाबहुसंयुतम्[2] ॥८३२॥

कर्तव्यमुत्सवं[3] चानु गीतनृत्तसमाकुलम्[4] ॥८३३॥

830-33. Anointed, bathed, garlanded and well-dressed, one should worship the goddess Śyāmā, in the vine-grove, with flowers, incense, grains, eatables, much half-ripe barley, purified butter and honey, and by gratifying the Brāhmaṇas. O twice-born, the grapes should be offered, first of all, to the Brāhmaṇas. Then, the meals consisting mostly of grapes should be taken and after that a festival full of dancing and singing should be celebrated.

प्रतिमासं च[5] पुष्येण राज्ञः स्नानं विधीयते ।
ज्योतिषोक्तविधानेन सर्वकालफलप्रदम्[6] ॥८३४॥

834. King's bath (to be performed) in accordance with the instructions of works on astrology, which is fruitful at all times, is prescribed on the day of Puṣya constellation in every month.

जन्मर्क्षे[7] च गते[8] चन्द्रे सर्वेणैवं[9] तथा द्विज ।

---

1. भोक्तव्या G
2. संमता G
3. कर्तव्यश्चोत्सवो G
4. समाकुलः G, श्यामादेवी पूजा add A, नीलमते—BDEF, इति श्री नीलमतपुराणे श्यामादेवीपूजावर्णनं नाम षष्टितमोऽध्यायः C.
5. Thus A, तु other MSS.
6. सर्वकामफलप्रदम् BEFG
7. जन्मर्क्षे B
8. सिते A
9. सर्वैरेवं G

Ed. Leiden v.v. 800-803

चन्द्रस्य पूजा[1]कर्तव्या नक्षत्रग्रहयोस्तथा[2] ॥८३५॥

नक्षत्रदेवता याश्च पुष्पधूपान्नसम्पदा ।
विप्राग्निपूजनं कार्यमुत्सवं[3] गीतवादितैः[4] ॥८३६॥

835-36. O twice-born, all should worship the moon, the stars, the planets and also the gods of the constellations, with the wealth of flowers, incense and food, at the time when the moon is united with Janma-constellation. The Brāhmaṇas and the fire should be worshipped and the festival of vocal and instrumental music should be celebrated.

संवत्सरस्याथ[5] कार्यो[6] लक्षहोमो[7] महीक्षिता[8] ।
कोटिहोमस्तथा कार्य[9] एक एव द्विजोत्तम ॥८३७॥

तयोर्विधानं विज्ञेयं कल्पेष्वाथर्वणेषु च ॥८३८॥

837-838. O best among the twice-borns, the king should perform every year, a Lakṣahoma and a Koṭihoma. The procedure of their performance should be known from the Kalpa (sūtras) and the works related to the Atharvaveda.

1. चन्द्रपूजा च G
2. तदा A
3. उत्सवो G
4. Thus other MSS, वादिभिः A
5. प्रति संवत्सरं G
6. Thus other MSS, कार्यं A
7. लक्षहोमं E
8. महीक्षिताम् BDEF
9. Om. E

Ed. Leiden v.v. 804-805

नित्यानि तानि[1] कर्माणि निमित्तेष्ववराणि च ।
सम्मन्त्र्य सह कार्याणि[2] संवत्सरपुरोहितैः[3] ॥८३९॥

839. All these acts which are to be performed always, and others which are for specific purposes, should be performed after consulting the astrologers and the priests.

अभिषेकाह्नि कर्तव्यं[4] प्रतिसंवत्सरं नृपैः[5] ।
अभिषेकं[6] द्विजश्रेष्ठ यथापूर्वं सदैव तु[7] ॥८४०॥

840. O best among the twice-borns, the kings should take the coronation-bath, every year at the anniversary of their coronation, always in the same manner as in the beginning.

पुरोधाः[8] सोपवासस्तु जुहुयाज्जातवेदसि[9] ।
गणं चैव प्रतिरथं शब्दवर्षगणावुभौ ॥८४१॥

आयुष्यमभयं चैव तथा स्वस्त्ययनं परम् ।
वैष्णवानि च मन्त्राणि शाक्राणि विविधानि च[10] ॥८४२॥

सावित्र-ब्राह्म-रौद्राणि वारुणानि तथैव च[11] ।
नगरं च तथा कार्यं पताकाध्वजसंकुलम्[12] ॥८४३॥

841-43. Having undergone a fast, the priest should

---

1. Thus A, एतानि other MSS.
2. कार्याणि सह संमन्त्र्य G,
3. नीलमते राजकर्माणि add ABDEF, इति नीलमते राजकर्मविधि-वर्णनम् G,
4. दातव्यं AH.
5. बुधैः BE, नृप A.
6. अभिषेको G
7. Thus A, तथा सदा other MSS.
8. पुरोगः BF
9. जातवेदसे G
10. चान्यानि च यथाविधि B, शैवानि च यथाविधि H.
11. यथाविधि E
12. This pāda om. AH.

Ed. Leiden v.v. 806-810

give offerings in the sacrificial fire, with the groups of formulae, namely Pratiratha, Śabda, Varṣa, Āyuṣya and Abhaya, and with mantras sacred to Viṣṇu, Śakra, Savitā, Brahmā, Rudra and Varuṇa. The city should be made swarming with flags and banners.

नीरजस्कं तथा कार्यं[1] राजमार्गं जलैः शुभैः[2] ।
पौरैः स्नातैः सुवस्त्रैश्च भाव्यं मङ्गलमालिभिः[3] ॥८४४॥

844. The road should be made dustless by (sprinkling) pure waters. The citizens—bathed and well-dressed—should wear garlands.

गन्तव्यं वारमुख्याभिस्तथा राजनिवेशनम् ।
पौरमुख्यैस्तथा बाह्यै[4]र्गणमुख्यैस्तथैव च ॥८४५॥

845. The prominent courtesans, the prominent citizens, the outsiders and the chiefs of the gaṇas should go to the palace of the king.

शोभनीयं च नगरं मार्गाश्च नटनर्तकैः ।
राजा स्नातः पुनः[5] स्नाप्यः पञ्चगव्येन धार्मिकः ॥८४६॥

846. The city and the roads should be adorned by actors and dancers. The pious king, who has already taken bath, should be again bathed with the five products of the cow (i. e. milk, curd, butter, urine and dung).

मृत्ताम्ररौप्यसौवर्णैः स्नापनीयो घटैस्तथा[6] ।
तोयस्य पयसो दध्नः सर्पिषश्च तथायुतैः[7] ॥८४७॥

1. This pāda om. A.
2. शुभैर्जलैः H.
3. मंगलमौलिभिः B
4. Thus G, बाद्यै other MSS.
5. पुरः AH.
6. Thus AB, तथा घटैः other MSS.
7. सर्षपैश्च तथायुतैः E

Ed. Leiden v.v. 811-814

शूद्रविट्क्षत्रविप्राणां[1] गणमुख्यैर्यथाविशम् ।
पश्चाद् दक्षिणतः प्राक् च उत्तरेण यथाक्रमम् ॥८४८॥

847-48. He should be bathed by the chiefs of gaṇas of the Śūdras, the Vaiśyas, the Kṣatriyas and the Brāhmaṇas, (standing) in west, south, east and north respectively, by means of pitchers made of earth, brass, silver and gold and full of water, milk, curd and purified butter.

स्नानकाले च कर्तव्यं महत्कलकलं तथा[2] ।
वादित्रशंखपुण्याहं[3] सूतवन्दिजनैः[4] सह ॥८४९॥

849. A great uproar consisting of the sounds of musical instruments, conch-shells, wishes for happy day along with (the sounds of) professional singers, should be made at the time of bath.

सामन्तैस्तु तथा भाव्यं छत्रचामरपाणिभिः ।
राजा स्नातः पुनः[5] स्नाप्यो मृत्तिकाभिर्यथाक्रमम् ॥८५०॥

850. The subordinate kings should have umbrellas and chowries in their hands. The king who has already taken bath, should be again bathed with clays, in the proper order.

पर्वतो[6]ऽल्वंमृदा[6] राज्ञः[7] शिरः[8] संशोधयेत् तदा[9] ।

1. विप्र om. E
2. कर्तव्यो महान् कोलाहलः शुभः G
3. पुण्याह EG.
4. स्नातवन्दिजनैः B
5. पुरः H
6. पूर्वतोऽल्वमृदा ABD
7. राज्ञां E
8. शिरं AH
9. संवेदयेत्तथा ABDEH

Ed. Leiden v.v. 815-817

शोध्यौ कर्णौ च वल्मीका[1]च्छक्रस्थाना[2]च्च कन्धरा[3] ॥८५१॥

851. Then, the head of the king should be purified with the clay from the peak of a mountain, the ears should be sanctified (with the clay) from an ant-hill and the neck with that from the temple of Śakra.

राजवेश्मगृहद्वाराद्धृदयं तस्य शोधयेत् ।
देवालयमृदा पृष्ठं[4] दक्षिणं तु[5] तथा[6] भुजम् ॥८५२॥

गजदन्तोद्धृतमृदा वृषशृंगमृदापरम्[7] ।
वैश्यद्वारात्कटिं[8] चास्य ऊरू कमलिनीमृदा ॥८५३॥

852-53. His heart should be purified with the clay from the door of king's palace, and the back with the clay from the temple. The right arm (should be purified) with the clay dug by means of elephant's tusk and the other one, with the earth dug with the horn of the bull. His waist (should be purified) with the earth from the door of a Vaiśya and his thighs with the earth from a lake of lotuses.

पौरैः स्नातैः सुवस्त्रैश्च भाव्यं मङ्गलपाणिभिः ।
मृद्भिः स्नाप्य[9] ततः स्नाप्यो[10] राजा सर्वौषधैः शुभैः[11] ॥८५४॥

1. वल्मीकमृदा G
2. Thus BH, चक्रस्थानात् E, छत्रस्थानात् ed. Leiden
3. गोस्थानाच्च तथा जंघे पादौ चोभौ सरो मृदा add DEF
4. मृष्टं B
5. च FG,
6. तदा B
7. परः G
8. Thus ADEG, कटी other MSS.
9. स्नातश्च BG
10. च संस्नाप्यो G
11. सर्वौषधिगणैः G

Ed. Leiden v.v. 818-821

सर्वगन्धैः सर्वरत्नैः सर्वबीजैस्ततः परम् ।
सर्वपुष्पैः सर्वफलैर्दूर्वा[1]गोरोचनांकुरैः ॥८५५॥

854-55, The citizens—bathed and well-dressed—should hold auspicious things in their hands. Already bathed, the king should again be bathed with (water sanctified with) all auspicious herbs, all scents, all jewels, all seeds, all flowers, all fruits, Dūrvā-grass, Gorocana paint and sprouts.

ततो भद्रासनगतं तीर्थतोयैःशुभाम्बरैः[2]।
यथाशक्ति समानीतैः[3] पुरस्कृत्य[4] पुरोहितम्[5] ॥८५६॥

नृपतिस्त्वभिषेक्तव्यो[6] दैवज्ञवचनान्नरैः ।
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रमुख्यै[7]स्तथैव च ॥८५७॥

मुख्याभि र्वारमुख्याभिर्वणिग्भिश्च यथोचितम् ।

856-58a. Then, keeping ahead the priest seated on bhadrāsana, the well-dressed people—the Brāhmaṇas, the Kṣatriyas, the Vaiśyas, the chiefs of the Śūdras, the leading courtesans and the merchants—should anoint the king in proper manner, in accordance with the sayings of the astrologer, with the water of the sacred places brought there, as far as possible.

ततः स्नातोऽनुलिप्ताङ्गः[8] कृतदैवतपूजनः[9] ॥८५८॥

---

1. Thus BDFGH. धूर्वा other MSS.
2. शुभाम्बरम् BFG
3. समासीनः A
4. पुरस्कृतं H
5. पुरोधसम् CH
6. स्वभिषेक्तव्यो G
7. शूद्रैर्मुख्यैः G
8. अवलिप्ताङ्गः B
9. कृतदैवज्ञपूजनः F

Ed. Leiden v.v. 822-825a

आबद्धमुकुटः स्रग्वी बद्धपट्टो विभूषितः ।

मङ्गलालभनं[1] कृत्वा दत्त्वा पूर्णाहुतिं ततः ॥८५९॥

पूजयेत घनौघेन दैवज्ञं सपुरोधसम्[2] ।
यथाशक्ति द्विजांश्चान्यानभयं[3] चैव घोषयेत् ॥८६०॥

858-60. Then, the king—bathed, anointed, crowned garlanded diademed and decorated—should worship the gods, touch the auspicious objects, give the last offering (in the sacrifice) and after that, honour with heaps of wealth, the astrologer along with the priest and other Brāhmaṇas, as far as the means may allow. He should also announce freedom from fear.

आघातस्थानगान्[4] सर्वान् विसृजेत् यथा[5] पशून् ।
मोक्षयेद् बन्धनात्सर्वान्[6] ऋते लोकस्य कण्टकान् ॥८६१॥

861. He should release all who are gone to the slaughter-house, like the animals (gone to the slaughter-house). All, except those who are thorns for the world, should be released from bondage.

व्याघ्रचर्मोत्तरे रम्ये तदा[7] सिंहासने शुभे ।
उपवेश्यो भवेद् राजा स्वयं गृहपुरोधसा[8] ॥८६२॥

862. The Home-priest himself should make the king sit on an auspicious and beautiful Lion-throne covered with the skin of a tiger.

---

1. मङ्गलालभनं G
2. पुरोहितं E
3. अयं A
4. आगतान्—H, अघातस्थानगान् A
5. तथा G
6. Second and third pādas of this verse om. E
7. तथा C
8. Thus other MSS., गृहं पुरोधसा A

Ed. Leiden v.v. 825b-829a

पश्येरन् प्रकृतीः सर्वाः स्वयं मङ्गलपाणयः ।
छत्रायुधाद्यं[1] सम्पूज्य गजसङ्घांस्तुरङ्गमान्[2] ॥ ८६३॥

आरुह्यालङ्कृतं नागं विसृजेद्ध[3]नसञ्चयान्[4] ।
प्रक्रम्य नगरं सर्वं प्रविश्य[5] च तथा गृहम्[6] ॥८६४॥

सामन्तपौरमुख्यांश्च[7] धनेनार्च्य[8] विसर्जयेत्[9] ॥८६५॥

863-65. With auspicious objects in their hands, all the subjects should see (him).

Having worshipped the umbrella, the weapons, the arrays of elephants and horses, he should climb a decorated elephant and give away heaps of wealth.

Having gone around the whole of the city, he should return to his home, honour the subordinate kings and the leading citizens with wealth and bid farewell to them.

नित्यं राज्ञा समुत्थाय पूजनीयाः सुरद्विजाः ।
वह्निसम्पूजनं कार्यं द्रष्टव्यं वदनं घृते ॥८६६॥

866. Having got up, the king should daily worship the gods, the twice-born, and the fire and see the (reflection of his own) face in purified butter.

---

1. छत्रायुधाभ्यां B
2. गजसङ्घं तुरङ्गमम् B, गजसङ्घतुरङ्गमान् F
3. व्यसृजत् B
4. धनसंचयम् E
5. निवेश्य A
6. गृहं तथा E
7. सामन्तान् पौरमुख्यांश्च BG
8. चाभ्यर्च्य हर्षात् G
9. नीलमते संवत्सराभिषेकः add BDEF इति श्री—H,—वत्सराभिषेकः A. इतिश्रीनीलमतपुराणे वत्सराभिषेकवर्णनं नाम अष्टषष्टितमोध्यायः । 'नील: C

Ed. Leiden v.v. 829b-832

श्रोतव्यं तिथिनक्षत्रं[1] कर्तव्यं वैद्यभाषितम् ।
सभासंस्थेन[2] द्रष्टव्यो व्यवहारस्तथा समः ॥८६७॥

867. (He should) listen to the announcement of the date and the constellation and act according to the instructions of the physician. Having gone to the court, he should see to the legal procedure impartially.

विमानना न कर्तव्या कस्यचिच्च कदाचन ।
स्वभेदो रक्षितव्य[3]श्च नित्यं ब्राह्मणपुङ्गव ॥८६८॥

868. O best among the twice-borns, (the king) should never insult anybody and should always check internal dissension.

दुर्गत्वादस्य देशस्य परचक्रभयं विना ।
स्वभेदेनेह नश्यन्ति बद्धमूला नराधिपाः ॥८६९॥

869. This country being difficult to approach and so free from the fear of the circle of enemies, the strongly-rooted kings are destroyed here due to internal dissension.

नित्यं सन्निहिता देवाः कश्मीरामण्डले[4] द्विज ।
तेषां भक्तिः सदा कार्या नागेषु[5] ब्राह्मणेषु च ॥८७०॥

870. O twice-born, the gods always reside in Kaśmīrāmaṇḍala. Devotion must be shown towards them and also towards the Nāgas and the Brāhmaṇas.

पूज्याः पिशाचाश्च तथा बलिपूर्वेण कर्मणा ।
देशानुकाराः कर्तव्या जनाः कार्याः स्वधिष्ठिताः[6] ॥८७१॥

1. तिथिपत्रं च G
2. Thus A, सभासदेन BDEF
3. रहितव्य A
4. काश्मीरमण्डले E
5. Thus A, नागानां other MSS.
6. Thus A, Sing. used in other MSS. देशानुसारः G
Ed. Leiden v.v. 833-837

871. The Piśācas also should be worshipped with the rites including home-offerings. The people should be settled well and made to follow the (traditions of the) country.

आगतश्च जनः सर्वः पूजनीयो दिगन्तरात् ।
दण्डोऽपराधप्रतिमः कार्यः सर्वस्य काश्यप ॥८७२॥

नोग्रदण्डो भवेद् राजा क्षमेत[1] न च[2] कस्यचित् ।
कारयेत तथा[3] राज्यं राजशास्त्रोपदेशतः ॥८७३॥

872-73. All the people immigrating (to Kaśmīra) from the other directions, should be honoured. O descendant of Kaśyapa, all should be penalized in accordance with their crimes. The king should neither be very hard in giving punishment nor should forgive anyone. He should carry on the administration in accordance with the instructions of the treatises on polity.

निकुम्भे निर्गते ब्रह्मन् तथा चैवाप्यनागते[4] ।
षण्मासमध्ये कर्तव्या यात्रा देवगृहे नृपैः ॥८७४॥

874. O Brahman, during the six months, when Nikumbha has gone out and not returned, the kings should go on pilgrimage, to the temple of the god.

संवत्सरे[5] सकृत्[6] कार्यं[7] देवतानां गृहे गृहे ।
यात्रोत्सवं[8] यथा[9] ब्रह्मंस्तथा मे गदतः शृणु ॥८७५॥

1. क्षमते E
2. च न FG
3. तदा E
4. देवेप्यनागते BD
5. संवत्सरं AH
6. सदा G
7. कार्यो G
8. यात्रोत्सवः AGH
9. तथा AH

Ed. Leiden v.v. 838-841

375. O Brahman, listen from me, who is telling the procedure in which the festival of the pilgrimage should be celebrated, in every temple of the gods, at least once a year.

विनायकगृहे यात्रा चतुर्थ्यां संप्रशस्यते[1] ।
कुमारस्य गृहे षष्ठ्यां[2] सप्तम्यां सवितुस्तथा ॥८७६॥

दुर्गागृहे नवम्यां च पञ्चम्यां श्रीगृहे तथा ।
अष्टम्यां वा चतुर्दश्यां[3] महादेवनिवेशने ॥८७७॥

शक्रवेश्मनि चाष्टम्यां पौर्णमास्यां कलाभृतः[4] ।
धनदस्य चतुर्थ्यां तु[5] पञ्चम्यां वरुणस्य तु[6] ॥८७८॥

876-78. Praised is the pilgrimage on the 4th to the abode of Vināyaka, on the 6th to the abode of Kumāra, on the 7th to that of the sun, on the 9th to the temple of Durgā on the 5th to the temple of Śrī, on the 8th or the 14th to the temple of Mahādeva, on the 8th to the temple of Śakra, on the bright 15th to that of the Moon, on the 4th to that of Dhanada and on the 5th to that of Varuṇa.

पञ्चमी द्वादशी चैव पौर्णमासी तथैव च ।
सर्वेषामेव नागानां यात्राकर्मणि पूजितः ॥८७९॥

---

1. सम्पश्यते E
2. Thus A, कार्त्तिकेयालये षष्ठ्यां G, षष्ठ्यां कुमारस्य गृहे other MSS.
3. Thus all MSS, चतुर्थ्यां वा Ed. Leiden.
4. om. E
5. च B
6. च B, after this occurs चतुर्दश्यां चतुर्थ्यां वा कार्यं यमनिवेश्मनि more in BEF. This śloka om. AH.

Ed. Leiden vv. 842-845

शुक्लपञ्चदशी शस्ता[1] सर्वदेवेषु काश्यप ।
सर्वासु कार्यं तिथिषु तथातिथिनिवेशने[2] ॥८८०॥

879-80. The fifth, the twelfth and the fifteenth are honoured for pilgrimages to the abodes of all the Nāgas.

O descendant of Kaśyapa, the bright fifteenth is prescribed (for visiting the abodes of) all the gods. The houses of the guests may be visited on all the dates.

यात्रां तु कर्तुकामेन[3] पूर्वमेव दिने शुभे ।
विनायकपतेः पूजा कर्तव्या मोदकोत्करैः ॥८८१॥

881. He who intends to go on a journey should, first of all, worship the lord of Vināyakas, on an auspicious day, with heaps of sweetmeats.

द्वितीयेऽहनि कर्तव्या ग्रहशान्ति[4] स्ततः[5] परम् ।
तृतीयेऽहनि कर्तव्यं गन्धर्वाणां च पूजनम् ॥८८२॥

882. On the 2nd day should be observed the pacification of the planets and on the 3rd should be performed the worship of the Gandharvas.

चतुर्थेऽहनि कर्तव्यं पिशाचानां च पूजनम् ।
पञ्चमेऽहनि कर्तव्यं स्थाननागस्य[6] पूजनम् ॥८८३॥

883. On the 4th, the Piśācas should be worshipped and on the 5th should be performed the worship of the local Nāga.

---

1. शप्ता D
2. निवेशनम् G
3. कर्तुः कामेन Ed. Leiden
4. ग्रहकान्तिः G
5. Thus AD, तथा other MSS.
6. स्नाने नागस्य BD

षष्ठेऽहनि च कर्तव्यं ब्राह्मणानां च पूजनम् ।
सप्तमेऽहनि कर्तव्यं[1] दीनानाथस्य पूजनम्[2] ॥८८४॥

884. On the 6th day, the Brāhmaṇas should be honoured and on 7th, the poor and the helpless.

एवं तु यजनं[3] कृत्वा[4] यथावद् दिनसप्तकम् ।
ततस्तु स्नापनं[5] कार्यं विधिना येन तच्छृणु ॥८८५॥

885. Listen to the procedure, in which the bath-giving ceremony should be celebrated, after having performed thus properly, the sacrifice for seven days.

सुधावदातं कर्तव्यं चित्रितं देवतागृहम् ।
एवं तु यजनं कृत्वा[6] कुसुमोत्करभूषितम्[8] ॥८८६॥

ततोऽर्चास्नापनं[8] कार्यं कल्पशाखाविधानतः[9] ।
पुण्याहगीतघोषेण सुभगानर्त्तितेन[10] च ॥८८७॥

886-87. The temple of the god should be whitewashed and painted. Having thus performed the sacrifice dacorated with multitude of flowers, the image should be bathed, in accordance with the instructions of Kalpa and Śākhā, amidst sounds of goodday-songs and dances of fortunate ladies.

---

1. Second and third pādas om. BD.
2. Thus A, दीनानाथजनस्य च other MSS.
3. योजनं H
4. गत्वा H
5. स्नपनं GH
6. आचारं शौचपूर्वं तु G
7. शोभितम् BFG
8. स्नपनं G
9. कल्पशाखानुसारतः G
10. नर्तनेन BDEF

Ed. Leiden v.v. 85(-853

ततोऽर्चास्नापनस्यार्थं[1] पौरैर्नृत्तपुरःसरैः[2] ।
आनीतव्यं[3] च महता विभवेनोदकं शुभम् ॥८८८॥

888. Thereafter, the citizens, with dances leading their procession, should bring the holy water for bathing the image, with great pomp and show.

तीर्थात् संनिहिताद्[4] राजन् गजपृष्ठाधिरोहितम्[5] ।
अश्वयानेऽथगोयाने नरयाने तथा[6] पुनः ॥८८९॥

889. (The water should be brought) from a sacred place situated near by, placed either on the back of an elephant or in a conveyance drawn by horses or bulls or men.

प्रतिमां तेन सम्प्राप्य[7] स्नापयेत[8] यथाविधि ।
राजाभिषेककथितं[9] कार्यं[10] च नगरे विधिम्[11] ॥८९०॥

890. Having got (water), they should bathe the image with that (water) in the proper manner. As regards the city, the same procedure as told with reference to the coronation of the king, should be followed.

---

1. स्नापनस्यार्थे ADG, स्थापनस्यार्थं EF, स्नापनस्यान्ते B
2. Thus ACDE FH, नृत्तपुरःसरम् Ed. Leiden
3. आनेतव्यं GH
4. सनिहितं C
5. —रोहनम् C,—रोपितम् B, —रोहणम् AH
6. अथवा G
7. संप्लाव्य G
8. स्नपयेत GH
9. कथितः GH, राजाभिषेकः कथितः B
10. कार्यः GH
11. विधिः GH

Ed. Leiden v.v. 854-856

प्राप्तेऽथ यात्रादिवसे[1] कूटागारं तु कारयेत् ।
वस्त्रैर्माल्यैस्तथा गन्धैः[2] पताकाभिरलंकृतम् ॥८९१॥

891. At the arrival of the day of the pilgrimage, Kūṭāgāra decorated with clothes, garlands, scents and banners should be constructed.

आरोप्य प्रतिमां तत्र तत्सरूपां तथापराम्[3] ।
कूटागारश्च वोढव्यस्तुरगैर्गोभिरेव वा[4] ॥८९२॥
बलिभिः पुरुषैर्वापि माल्यवस्त्राद्यलंकृतैः[5] ।
नृपेण सोऽनुगन्तव्यः[6] सबलेनाथ पृष्ठतः ॥८९३॥

892-93. Having placed there the (original) image and another of similar form, the Kūṭāgāra should be drawn by horses or bulls or strong men decorated with garlands and clothes. The king along with his army should follow.

प्रधानेनाथ गन्तव्यं[7] नृपहीने तथा पुरे[8] ।
धूपपूजा प्रदातव्या स्थाने स्थाने तथापरैः ॥८९४॥

894. If the city has no king, the president (Pradhāna) should accompany (the procession). Others should offer worship with incense at various places.

क्ष्वेडितोत्कृष्टशब्दैश्च[9] जयवाद्यस्वनैस्तथा ।
पथा समेन[10] नगरं भ्राम्येत कूटगृहं शुभम् ८९५॥

---

1. om. space left H
2. Thus A, रत्नैः other MSS.
3. Thus other MSS, यथापराम् A
4. Thus BDE, च other MSS
5. —कृतः G
6. Thus other MSS, नृपे मासो स गन्तव्यः A
7. गन्तव्यो BEH, च कर्तव्यं G
8. नृपहीनस्तथापरः E
9. क्ष्वोडित—D, क्षेडितोत्कृष्टकृतैः शब्दैः E
10. यथा स्वनेन BEFH

Ed. Leiden v.v. 857-861

895. Amidst murmuring sounds, high sounds and the cries of victory, the auspicious Kūṭagṛha should be carried around the city through an even road.

ततः प्रवेश्य[1] प्रतिमां देववेश्मनि काश्यप[2] ।

महान्तमुत्सवं[3] कार्यं[4] गीतनृत्तसमाकुलम् ॥८९६॥

896. Then, after the entrance of the image into the temple of the god, a great festival of singing and dancing should be celebrated.

द्वितीयेऽहनि दातव्या प्रेक्षा रङ्गोपजीविनाम् ।

तेषां शक्त्या धनं देयं मल्लादीनां द्विजोत्तम ॥८९७॥

897. The arrangements for dramatic performances of those who earn their living by the stage, should be made on the next day. O best among the twice-borns, money should be given to wrestlers and others in accordance with their strength and efficiency.

प्रेक्षाकाले[5] च कर्तव्यं प्रेक्षकाणां च पूजनम्[6] ।

मनुष्याणां द्विजश्रेष्ठ ताम्बूलकुसुमादिभिः ॥८९८॥

898. O best among the twice-borns, at the time of the dramatic performances, the human spectators should be honoured with betel-globes, flowers etc.

ओदनं विकिरेद्[7] भक्त्या सपुष्पफलसंयुतम् ।

भूतानां खन्यदृश्यानां[8] प्रेक्षकाणां द्विजोत्तम[9] ॥८९९॥

---

1. प्रविश्य ABC
2. स्थापयेत् E
3. उत्सवः G
4. कार्यः G
5. प्रेक्ष्याकाले D
6. पूजयेत् F
7. विकरेद् BC
8. खल्वदृश्यानां Ed. Leiden
9. नीलमते यात्रोत्सवः add ABDE, then folows बृहदश्व उवाच. उवाच, om. A

Ed. Leiden v.v. 862-865

899. O best among the twice-borns, cooked rice along with flowers and fruits should be scattered for the beings, who are invisible spectators in the cave.

बृहदश्वः

इत्युक्तवान् स नागेन्द्रो ब्राह्मणं तं[1] यशस्विनम् ।
एतत् प्रयत्नं[2] कर्तव्य[3]मारोग्यायुर्धनेप्सुभिः ॥९००॥

Bṛhadaśva (said)

900. The lord of the Nāgas spoke thus to that Brāhmaṇa possessed of fame. This should be done with effort, by those who desire health, (long) life, and wealth.

वित्तशक्त्या करिष्यन्ति ये जना[4] नीलभाषितम् ।
तेषामारोग्यमायुश्च धनं च भविता बहु ॥९०१॥

901. For those people who shall act according to the instructions of Nīla as far as their means permit, there shall be health, (long) life and much wealth.

देहभेदे गमिष्यन्ति देवलोकं न संशयः ।
पुत्रपौत्रास्तथैतेषां स्वर्गायुर्धनभागिनः ॥९०२॥
भविष्यन्त्यायुषोपेता नात्र कार्या विचारणा ।
तवापि[5] विदितं राजन् सकलं नीलभाषितम् ॥९०३॥

902-3. After death, these people will certainly go to the world of the gods. Their sons and grandsons also shall share heaven, (long) life and wealth and shall be provided with long life. There is no doubt here. All the sayings of Nīla are known to you also, O king!

---

1. तु A
2. Thus ABE, प्रयत्नात् other MSS
3. कर्तव्यः B
4. Thus ABEG, नराः other MSS.
5. तथापि BH

Ed, Leiden v.v. 866-869

लोके देशेऽधिकमतः श्रुत्वा कुरु यथासुखम् ।
कालदोषसमुद्भिन्नं[1] यत् किञ्चिन्नीलभाषितम्[2] ॥९०४॥
तत् सर्वं कुरु राजेन्द्र मम वाक्येन मानद ।
नीलवाक्यं न क्रियते[3] भवतीहोदकप्लवः ॥९०५॥
अतिवृष्टिरनावृष्टिर्दुर्भिक्षं मरणं [4]तथा ।
अकाले राजमरणं राजदण्डश्च दारुणः[5] ॥९०६॥

904-6. So having heard (all this), act thus as to bring more happiness in the world and the country. Whatever instruction of Nīla has been in abeyance due to the fault of time, revive all that, O king, the giver of honour, at my saying.

If the instructions of Nīla are not followed, then occur here floods, excess of rain, drought, famine, deaths, untimely death of the king, and dreadful punishments from the king.

हिमस्यैव प्रपतनं भूरि चैव प्रजायते[6] ।
तस्माच्छ्राव्यं तु लोकानां बहुशो नीलभाषितम् ॥९०७॥

907. The snow-fall also occurs to a great extent. So the instructions of Nīla must be announced to the people repeatedly.

तत्कर्तारो भविष्यन्ति पशुधान्यधनैर्युताः ।
त्वं चापि[7] विजयी शश्वत् सर्वत्रैव भविष्यसि[8] ॥९०८॥

---

1. कालदोषसमुच्छिन्नं Ed. Leiden
2. Third and fourth Pādas om. BDF
3. कुरुते B
4. दुर्भिक्षमरणे तथा BDEFG
5. दारुणम् BEF
6. Thus AH, उपजायते other MSS.
7. Thus other MSS., वापि A
8. इति नीलमते गोनन्दानुशासनम् Add G

Ed. Leiden v.v. 870-874

908. Those who act upon them shall be endowed with cattle, grains and wealth. You, too, shall be always victorious everywhere.

वैशम्पायन उवाच[1]

एवमुक्तोऽपि[2] गोनन्दो[3] बृहदश्वेन भूमिपः ।
प्रावर्तयत् समुच्छिन्नानाचारान् कालदोषतः[4] ॥९०९॥

909. Vaiśampāyana said : "Even told thus by Bṛhadaśva, the king Gonanda restarted (only a few of the) practices which had been in abeyance due to the fault of time.

तस्मात्[5] स बलभद्रेण मथुरायां निपातितः ।
नीलोक्तं वचनं[6] राजा काश्मीरः सकलं[7] यदि ॥९१०॥

करोत्यकाले मरणं नैव तस्योपजायते ।
तस्मिन् देशे तथातङ्को[8] नैव कश्चिद्[9] भविष्यति[10] ॥९११॥

910-11. Thereafter, he was overthrown by Balabhadra at Mathurā. If a king of Kaśmīra acts upon all the instructions of Nīla, he never meets with untimely death. There never occurs any terror in that country".

जनमेजयः

काश्मीरक[11]स्तु गोनन्दो बृहदश्वेन भाषितम् ।

1. Om. H
2. उक्तः सः G
3. गोविन्दो B
4. कालचोदितः A
5. ततः G
6. सकलं E
7. सकलः E
8. Thus G, तथातङ्कं other MSS.
9. किञ्चिद् GH
10. इतिनीलमते आचारमाहात्म्यम् add ABDEFGH, इतिश्रीनीलमतपुराणे आचारमाहात्म्यवर्णनं नाम एकसप्ततितमोऽध्यायः C
11. कश्मीरिक.

Ed. Leiden v. 875-877

श्रुत्वा स्वकीयमाचारं किमपृच्छदतः परम्[1] ॥९१२॥

912. Janamejaya (spoke) : "What did Gonanda—the king of Kaśmīra—ask after this, when he had heard from Bṛhadaśva, the customs to be followed by him?"

वैशम्पायनः[2]

काश्मीरक[3]स्तु गोनन्दो बृहदश्वेन भाषितम्[4] ।
श्रुत्वोवाच मुनिश्रेष्ठं[5] बृहदश्वं[6] नराधिपः[7] ॥ ९१३॥

913. Vaiśampāyana (said) : "Having heard the sayings of Bṛhadaśva, Gonanda—the king of Kaśmīra—spoke to Bṛhadaśva, the best of the sages."

गोनन्द उवाच[8]

प्राधान्येन तु ये नागाः कश्मीरायां[9] कृतालयाः ।
नामतस्तु समाचक्ष्व श्रोतुमिच्छामि तानहम् ॥९१४॥

914. Gonanda spoke : "Tell me the names of those Nāgas who have mainly their abodes in Kaśmīrā. I want to hear about them."

बृहदश्वः

नागानामाधिपो[10] नीलो वासुकिश्चोपतक्षकः ।
कम्बलाश्वतरौ[11] नागौ कार्कोटकधनञ्जयौ ॥९१५॥

---

1. Third and fourth Pādas om. ADE
2. उवाच add CG, om. A
3. काश्मीरिकः G
4. First and second pādas om. ADE
5. मुनिश्रेष्ठ BDE
6. बृहदश्व D
7. नराधिपम् BDEFH
8. Om. B
9. कश्मीरेषु G
10. नाम्ना नागाधिपो B
11. कन्धर्याश्वतरौ A

Ed. Leiden v.v. 878-881

915. Bṛhadaśva said : "(There live) Nīla, the king of the Nāgas, Vāsuki, Upatakṣaka, the two Nāgas Kambala and Aśvatara, (the two Nāgas) Kārkoṭaka and Dhanañjaya,

ऐलपत्रो[1] ह्यनन्तश्च नागौ नन्दोपनन्दकौ ।
कुलिकः श्वेतशङ्खश्च[2] पालासः[3] खेडिमो[4] बडिः ॥९१६॥

916. Ailapatra, Ananta, the Nāgas Nanda and Upanandaka, Kulika, Śvetaśaṅkha, Pālāsa, Kheḍima, Baḍi.

हेलिहालः शङ्खपालो नागौ चन्दननन्दनौ[5] ।
नागौ नीलमहानीलौ नागौ वातिकषण्डिकौ ॥९१७॥

917. Helihāla, Śaṅkhapāla, the two Nāgas Candana and Nandana, the two Nāgas Nīla and Mahānīla, the two Nāgas Vātika and Ṣaṇḍika,

द्वौ पद्मौ द्वौ महापद्मौ द्वौ कालौ द्वौ च कच्छपौ[6] ।
द्वौ समुद्रौ समुद्राणौ[7] द्वौ गजौ द्वौ च तक्षकौ ॥९१८॥

918. Two Padmas, two Mahāpadmas, two Kālas, two Kacchapas, two Samudras, two Samudrāṇas, two Gajas, two Takṣakas,

हस्तिकर्णौ ह्यु[8]भौ नागौ द्वौ हस्ती वामनावुभौ ।
महिषौ द्वौ वराहौ द्वौ कूपनौ[9] द्वौच पन्नगौ[10] ॥९१९॥

---

1. Thus ABDE, ऐलापत्रो other MSS.
2. Thus ABEFD
3. पालाशः A, पालस E, पालादः H
4. खेडिसो G, खेत्रिमो D
5. नन्दनचन्दनौ B, नन्दननन्दनौ F, this word and the next Pāda om. E
6. काश्यपौ D, कश्यपौ EF
7. समुद्रानौ EG
8. हि A only
9. कुनपौ A
10. शमनगौ E

Ed. Leiden v.v. 882-885

919. Two Nāgas named Hastikarṇa, two Hastis, two Vāmanas, Mahiṣas, two Varāhas, two Nāgas named Kūpana,

पानीयश्चाप्यनीकश्च[1] कनकाक्षः[2] कलिङ्ककः[3] ।
अर्जुनः पुण्डरीकश्च[4] धनदो[5] नडकूबरः ॥९२०॥

920. Pānīya, Anīka, Kanakākṣa, Kaliṅkaka, Arjuna, Puṇḍarīka, Dhanada, Naḍakūbara,

खेदः[6] शपालः खेरीशो[7] लाहुरो[8] लेदिर[9]स्तथा ।
खेडश्च[10] फरथाडश्च[11] जयन्त[12]स्त्वौसमस्तथा[13] ॥९२१॥

921. Kheda, Śapāla, Kherīśa, Lāhura, Ledira, Kheḍa, Pharathāḍa, Jayanta, Tvausama,

सूदनौ[14] द्वौ सुपार्श्वश्च सुनासः[15] पञ्चहस्तकः ।
प्रद्युम्नश्चान्धकः शम्भुः साल्वो[16] मूलेश्वरो[17] घशः[18] ॥९२२॥

---

1. अनेकश्च EH
2. कनकाख्यः E
3. कलंकः E, कलंगकः DF, कलुंगक B, कलिंगकः G
4. पौण्डरीकश्च ed. Leiden
5. Letters न दो om. A
6. खेडः BDG
7. खीरेशो DE
8. लाहरो D
9. Thus AG, लोदिरः other MSS.
10. खेदः G, खेलः B
11. फरथाश्वः BDEF
12. यजन्तो E
13. तौसमस्तथा EG, स्वौसमस्तथा F, तु समस्तथा H.
14. सुदनौ DE
15. सनासः B
16. Thus H, सालो D, स्वालवो C, स्वालो AG, स्वाल्वे B
17. षलेश्वर BDEF
18. घृषः H

Ed. Leiden v.v. 886-888

922. Two Sūdanas, Supārśva, Sunāsa, Pañcahastaka, Pradyumna, Andhaka, Śambhu, Sālva, Mūleśvara, Ghaśa,

उगोलसाहुनीमध्यौ[1] नागौ गन्धिलपिच्छलौ[2] ।

स्वधादो[3] मूषकादश्च[4] पिशितादो घटोदनः[5] ॥९२३॥

923. Ugola, Sāhunīmadhya the two Nāgas Gandhila and Picchala, Svadhāda, Mūṣakāda, Piśitāda, Ghaṭodana,

नारायणोऽनिरुद्धश्च वासुदेवो जलन्धमः[6] ।

पात्रश्च मानस[7]श्चैव तथैवोत्तरमानसः ॥९२४॥

924. Nārāyaṇa, Aniruddha, Vāsudeva, Jalandhama, Pātra, Mānasa, Uttaramānasa,

अमानसः[8] कपाली च नागः संकर्षणस्तथा ।

शतचारः[9] खिलेचारो[10] रोहिण्याख्यो[11]ऽथशक्तिकः[12] ॥९२५॥

925. Amānasa, Kapālī, Saṅkarṣaṇa, Śatacāra, Khilecāra, Rohiṇyākhya, Śaktika,

आखुफालो फलाफश्च नागः कानसर[13]स्तथा ।

सुस्रवो[14] देवपालश्च नागेन्द्रोऽथ वलाहकः[15] ॥९२६॥

926. Ākhuphāla, Phalāpha, the Nāga Kānasara, Susrava, Devapāla, the Nāga-chief Balāhaka.

---

1. उघोल--ed Leiden, उगोलमाहुनीमध्यौ DE
2. गंधलपिछलौ DE
3. सुवादो E
4. मूषिकाभश्च BDE, मूलकादश्च A
5. घटेदनः D, घटोदरः ed. Leiden
6. जलान्धमः H जलोन्धमः C
7. पानसः H
8. दुर्मानसः B, शमानसः E
9. शतदारः H, शतधारः DE
10. किलोशार DE, किलोशारो BF
11. रोहिण्याक्षो DH
12. शक्तितः ed Leiden
13. Thus other MSS., कावसरः A
14. आश्रवो E, सुभद्रो H
15. फलादृकः B, फलाफकः EF

[Ed. Leiden v.v. 889-892

चन्द्रसूर्याविभौ नागौ शुचिशुक्लौ विडूरथः[1] ।
फेलडः सुकुमारश्च खिडीवो[2] विजयो जयः ॥९२७॥

927. two Nāgas Candra and Sūrya, (two Nāgas) Śuci and Śukla, Viḍūratha, Phelaḍa, Sukumāra, Khiḍīva, Vijaya, Jaya,

ऊडूच[3]: क्रोफणो[4] वायुः शुक्रो[5] वैश्रवणोपमः ।
मण्डूकनासो[6] गान्धारो नागः शूर्पारकि[7]ध्वनिः ॥९२८॥

928. Uḍuca, Krophaṇa, Vāyu, Śukra, Vaiśravaṇa, Apama, Maṇḍūkanāsa, Gāndhāra, the Nāga Śūrpārki, Dhvani,

शमनो[8] लोलभो[9] भद्रो[10] बिन्दुर्बिन्दुसरो नडः[11] ।
तित्तिरिः प्रस्तभद्रश्च[12] नागो ग्रहपतिस्ततः[13] ॥९२९॥

929. Śamana, Lolabha, Bhadra, Bindu, Bindusara, Naḍa, Tittiri, Prastabhadra, the Nāga Grahapati,

---

1. विभूरथः D
2. खिडीचो A, खिडीवी H, खिनीवै DEF
3. Thus ACFG, ऊरूचः other MSS.
4. कोफणो BF
5. चक्रो BDEF
6. मण्डूकनागो B
7. शूर्परकिः B
8. शमलो BDEFG
9. लोलनो CH, लोलुनो ed. Leiden
10. Thus A, वभ्रः C, बभ्रु other MSS.
11. —रुहः BE, ततः G
12. Thus A, हस्तभद्रः C, हस्तिभद्रः other MSS.
13. तथा DEFG

अपराजितः पण्डितः कोपतिर्दुर्जयोष्टकः[1] ।
नागो हिमसर[2]श्चैव नागः फलसरः परः[3] ॥९३०॥

930. Aparājita, Paṇḍita, Kopati, Durjaya, Aṣṭaka, the Nāga Himasara, the Nāga Phalasara, Para,

तथा नागो ह्यग्रसरः[4] नागो नीलसरो विहा[5] ।
आशुलाक्षो[6]ऽक्षिपालश्च प्रह्लादो यमकस्तथा ॥९३१॥

931. The Nāga Agrasara, the Nāga Nīlasara, Vihā, Āśulākṣa, Akṣipāla, Prahlāda, Yamaka,

अनिष्टः सुमुखो वेदः खड्गपुच्छो[7] विभीषणः ।
मौहूर्त्तिकः प्रियस्वामी[8] कुमारश्चन्दनोपमः[9] ॥९३२॥

932. Aniṣṭa, Sumukha, Veda, Khaḍgapuccha, Vibhīṣaṇa, Mauhūrtika, Priyasvāmī, Kumāra, another Candanopama,

कपाल[10]श्चरणषण्डो[11] नागः पूरणकस्तथा ।
कदम्बश्चापदो वाली विभूतिः कालकुञ्जरः ॥९३३॥

---

1. Emend. कोपपतिदुर्जयोष्टकः C, कोपततिदुर्जयोष्टकः H,
   कौषततिमुर्जयोष्टकः D, कौषततिण्डजयोष्टकः E
   कौषततिन्दुर्जयोष्टकः BF, कोपपतिदुर्जयांषुकः A
2. हिमरसः EF
3. फलरसोऽपरः
4. तथा च नागोश्वसरो E,—रूपसरो G
5. विफा B
6. अशीलाक्षो BEF, अशूलाक्षो G
7. खड्गपद्मो C
8. प्रियः स्वामी B
9. Thus AH, चन्दनोपरः other MSS.
10. Thus ACG, कलापः other MSS.
11. चरणखेडो B

Ed. Leiden v.v. 896-899

933. Kapāla, Caraṇaṣaṇḍa, the Nāga Pūraṇaka, Kadamba, Apada, Vālī, Vibhūti, Kālakuñjara,

डवश्चक्रधरः श्वभ्रो[1] भवो[2] देहारको गुडः[3] ।
अन्धः पङ्गुस्तथा कुष्ठी काणो बधिरवण्ठकौ[4] ॥९३४॥

934. Ḍava, Cakradhara, Śvabhra, Bhava, Dehāraka, Guḍa, Andha, Paṅgu, Kuṣṭhī, Kāṇa, Badhira, Vaṇṭhaka,

अनागपादः कितवः[5] सूकरः प्रसवोत्करौ[6] ।
साधीयः शतपादश्च योगः शतमुखो द्रुहः[7] ॥९३५॥

935. Anāgapāda, Kitava, Sūkara, Prasava, Utkara, Sādhīya, Śatapāda, Yoga, Śatamukha, Druha,

अतिनिद्रोऽतिबहुभुग् बिन्दुनादः[8] शिरोजडः[9] ।
कामराक्षो[10] विशालाक्षः सुवर्ताक्षो[11] भयानकः[12] ॥९३६॥

936. Atinidra, Atibahubhuk, Bindunāda, Śirojaḍa, Kāmarākṣa, Viśālākṣa, Suvartākṣa, Bhayānaka,

---

1. श्वर्वा A
2. देवो BEF
3. गुरुः BDE
4. —कंटकौ E, —कंठकौ BF
5. Thus other MSS., कितयः A
6. Thus A, प्रसवो कणो C, प्रसवोत्कटौ other MSS.
7. शतमुखोद्रहः F
8. विन्मुनादः D
9. शिरोजरः DE
10. कामलाक्षो E
11. सुवताक्षों D सुवताक्ष्यों B, सर्वरक्षो C
12. दयानकः BDEF, भयः शकः C

Ed. Leiden v.v. 900-902

भूवीरो[1] धर्मलावण्यो[2] दैत्यराजः[3] षडङ्गुलः ।
गन्धर्वो धृतराष्ट्रश्च कुसुमः कुहरः[4] कुहः[5] ॥९३७॥

937. Bhūvīra, Dharmalāvaṇya, Daityarāja, Saḍaṅgula, Gandharva, Dhṛtarāṣtra, Kusuma, Kuhara, Kuha,

महाक्षश्च वधूसश्च[6] कदूसो[7] देवदानवौ ।
नक्षत्रो मषकः पीतो गौतमः सुशुभो जिहा[8] ॥९३८॥

938. Mahākṣa, Vadhūsa, Kadūsa, Deva, Dānava, Nakṣatra, Maṣaka, Pīta, Gautama, Suśubha, Jihā,

स्वर्गः[9] शिखरवासी[10] च श्रीवासः श्रीधरः खगः ।
लाङ्गली[11] बलभद्रश्च[12] स्वरूपः पञ्चहस्तकः ॥९३९॥

939. Svarga, Śikharavāsī, Śrīvāsa, Śrīdhara, Khaga, Lāṅgalī, Balabhadra, Svarūpa, Pañcahastaka.

कामरूपो दरीकर्णः[13] सप्तशीर्षो बलहरः[14] ।
सुनेत्रो बहुनेत्रश्च हनुमान् अङ्गदो हरः ॥९४०॥

---

1. भुव्रीवो C, कुवेरो G
2. धर्मलाटवो C, धर्मलटवो E, धर्मलपटो B, धर्मज्ञलटवो H, धर्मलटको G, धर्मलाटावं F
3. Thus other MSS., चैत्यराजः A
4. Twice in H
5. कुडः G
6. वटूसश्च C वटूपश्च H
7. कटूसो C
8. जिहः E, रिहः H
9. दुर्गः BDEFH
10. शिशिरवासी CD, शिरेवासी H
11. लांगुली D
12. बकभद्रश्च H
13. धरीकर्णः DF
14. Thus A, बहूधरः DF, बहूदरः B

Ed. Leiden v.v. 903-906

940. Kāmarūpa, Darīkarṇa, Saptaśīrṣa, Balahara, Sunetra, Bahunetra, Hanumān, Aṅgada, Hara,

हबकः[1] पाठरः[2] पाथो मलो विमलको मटः[3] ।
नागः शतमुखश्चैव चित्राश्वो दधिवाहनः[4] ॥९४१॥

941. Habaka, Pāṭhara, Pātha, Mala, Vimalaka, Maṭa, the Nāga Śatamukha, Citrāśva, Dadhivāhana,

सुशीमः कालियः कालः पटनः[5] खदिरस्तथा ।
अत्रिश्च शवलश्चैव वर्णको[6] ललन[7]स्तथा[8] ॥९४२॥

942. Suśīma, Kāliya, Kāla, Paṭana, Khadira, Atri, Śavala, Varṇaka, Lalana.

हेलियारो[8] हेमियारो[9] वलीरः[10] केलुको[11] निमिः ।
चाटरो लेलिहानश्च पञ्चास्यः[12] पिङ्गलोदरः[13] ॥९४३॥

943. Heliyāra, Hemiyāra, Valīra, Keluka, Nimi, Cāṭara Lelihāna, Pañcāsya, Piṅgalodara,

---

1. हनुरः H, हठकः ed. Leiden, हभकः C
2. पाटनः B, पाटलः E पाटकः C
3. मदः H, सरः C
4. दधिवर्णनः C
5. पटिनः E
6. Thus other MSS., वर्णलो A
7. Thus other MSS., कलमस्तथा A
8. —लिह्यरो A
9. हेमिवासो वा A, हिमियामी E, हिमियासो BF
10. बलीरः A, वरीलः BFG
11. कलुको A
12. कश्यपः BEF
13. Thus FG पिङ्गलोदकः CH पिङ्गलोचकः A लिगलोदरः E

Ed. Leiden v.v. 907 -909

कृतं[1] त्रेता द्वापरश्च समः संवत्सरस्तथा ।
खल्वाटो[2] बहुरोमा च कापोतिः पुष्पसाह्वयिः[3] ॥९४४॥

944. Kṛta, Tretā, Dvāpara, Sama, Saṃvatsara, Khalvāṭa, Bahuromā, Kāpoti, Puṣpasāhvayi.

राष्ट्रेश्वरः शिनीरिश्च[4] शतानन्दोऽतिकोपनः ।
आनन्दोऽथ जयानन्दः त्रिशीर्षो जटिलस्तथा ॥९४५॥

945, Raṣṭreśvara, Śinīri, Śatānanda, Atikopana, Ānanda Jayānanda, Triśirṣa, Jaṭila.

गन्धः सोम[5]स्तथा गार्ग्य इनिटिस्सनिटिस्तथा[6] ।
ऐरावतः सकौरव्यो माषादः कुमुदप्रभः[7] ॥९४६॥

946. Gandha, Soma, Gārgya, Iniṭi, Saniṭi, Airāvata, Kauravya, Māṣāda, Kumudaprabha,

हवोत्सवः[8] शठः शाण्यः[9] शत्रुघ्नो[10] रामलक्ष्मणौ ।
महादेवः कामपालो गोशिराः सयुधिष्ठिरः ॥९४७॥

947. Havotsava, Śaṭha, Śāṇya, Śatrughna, Rāma, Lakṣmaṇa, Mahādeva, Kāmapāla, Gośirā, Yudhiṣṭhira,

---

